117
/16

११७
/१६

(दीधीतिः)

"अथ अनुमानखण्डशिरोमणिः"

Atha Anuman khand shiromani

117
16

॥ ॥अनुमानखंडशिरोमणिप्रारंभः॥

१ श्रीगणाधिपतये नमः ॥ ॥ नमः सर्वभूतानि विष्टभ्य परितिष्ठति । अखंडानंदबोधाय पूर्णाय परमात्मने ॥ अध्ययनभावनाभ्यां सारं निपुणं निखिलतंत्राणां
यदीधितिमधिचिंतामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥ परजुष्टनयात्रिवर्तमानामनसा घर सविसुक्ष्मबोधैः । रघुनाथकवेरेष तद्दोषाकृतिरेषा विदुषां तनोतु
मोदं । न्यायमधीते सर्वस्तनुते कुतुकान्निबंधनमप्यत्र । अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः । मान्या प्रणम्य विहितां जनिरेषस्याविधायी
नयं विनिवेदयामि । दूष्यं वचो परं निपुणं विभाव्य भाव्य भावाव बोधविहितो मिलितेन दुनोति दोषः ॥५॥ ॥ पूर्वापरग्रंथैकवाक्यता प्रतिपत्तये शिष्या
णामवधानाय च संगतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि । अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च । प्रत्यक्षफलस्यानु
मित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपि न सर्वा प्रत्यक्षमिति तथानुमितयस्तु सर्वाः साक्षात् परंपरया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः । पुरु
तश्चायमुपजीवकत्वोत्कर्षः । यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननी समयमत्कृतेव्यतादिपरिच्छेदिकामनुमितिं । ईश्वरप्रत्यक्षं तु न फलं तथा
पि दृष्टद्वारकमिह तथात्वमादरणीयमितरस्याविनिगम्यत्वात् सर्वं वानुमितिकरणमिंद्रियापक्षोत्पत्तिके । अनुमितेर्भावयतोपीश्वरज्ञानस्य तत्करण
ता निर्वाहकप्रत्यासत्तिविरहेणातत्त्वात् सर्वं पुनरेंद्रियं नानुमानाधीनजन्म मनःश्रवणयोरन्यत्वात् दृष्टद्वारावातत्त्वमादरणीयं न चोत्पत्तिमदपींद्रियं दृ
ष्टद्वारकमनुमानमपेक्षते । अथोपजीव्ये निरूपितेव उपजीवकं निरूप्यत इति न नियमः क्वचित्कार्यं निरूप्यापि कारणनिरूपणादिति चेत् किं चातः नहि सं
गतिरनंतराभिधान व्याप्या । अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः संगतिः । जायते च कार्यकारणेवाज्ञाते कारणत्वस्य कार्य
त्वस्य वा ज्ञानात् किमस्य कार्यं कारणं वेति जिज्ञासा अतस्तयोरपि संगतित्वं इत्थं चोपजीवकतायास्तत्त्वेपि न क्षतिरिति मंतव्यं उपवायात्रैवोपमानस्य संगतिं दर्शयितुं कुव १

दीति । सुप्रसिद्धतया निरसनीयान्यवादिविप्रतिपत्तिकत्वेन सुप्रतिपादतया वानुमान एव व्युत्पत्तिल्लोभः प्रथमं जिज्ञासा नोपमाने प्रसिद्धत्वात् निरसनीयबहुवादिविप्र
तिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीरीतिमनुरुध्य वेदत्येन कस्यचित्प्रथमं दुरूहे जिज्ञासोदयेन क्षतिः तथा चावसरसंगत्योपमाननिरूपणमिति भावः । यथा
वसरस्य संगतित्वं तथा सुव्यक्तमाकरे । शास्त्रांतरसमयया द्व्यकं सं प्रवृत्तिनिमित्तकत्वबोधकसामान्यतो दृष्टमंततोदृष्टजनकप्रवृत्त्योपायिकं चानमानमपेक्षते ति
स्वलमेवोपमानमितीहाप्युपजीवकत्वमेव संगतिरित्यपि केचित् न संभवति चेह निरूपणयोरपि कार्यकारणभावः । अथ तत्पूर्वकमित्यादिसूत्रे प्रत्यक्षपूर्वकत्वेना
नुमाननिरूपणात् तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शादित्रापि सहकारप्रत्यक्षजन्यत्वादिनातन्निरूपणात् तस्य च प्रत्यक्षनिरूपणाधीनत्वात् एवमनुमानभि
त्वेनोपमाननिरूपणमपि अनुमाननिरूपणापेक्षमिति संक्षेपः ॥६॥ ॥ तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाननिरूपणीये करणस्य क्रियाभेदभिन्नमूर्तिक
तया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्त्यादिना । अत्र व्याप्तिविशिष्टत्वपक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्र
त्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् ज्ञानपदोपसंदाने न वा बाधिताबाधितसाधारणतज्ज्ञानलाभात् न भ्रांतानुमित्यव्याप्तिरि
त्याहुः तत्र । परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहे मानाभावात् गौरवेण तद्विषयवत्त्वेनाहेतुत्वात् संबंधसंबंधाग्रहेपि विशिष्टज्ञा
नत्वस्योपपादितत्वात् भूमसत्त्वेपि तादृशसामानाधिकरण्याप्रसिध्यत्तज्ज्ञानासंभवात् असत्ख्यातिनिरासात् । अवांतरवाक्यार्थयोग्यतानिर्णये महा
वाक्यार्थज्ञानानुदयात् विषाणेनाशसंबंधाभावनिश्चयदशायां शशविषाणजन्यं कार्मुकमिदमिति शाब्दबुद्धेर्व्रीहिशाणापि दुरुपपादत्वात् चात्र प्रमाण
प्रस्तावतः प्रमैव लक्ष्या यद्वा निरस्तलिंगपरामर्शादपि भ्रांतानुमितित्तदा चरमज्ञानपदं प्रमापरमिति वाच्यं अव्याप्त्योपक्षधर्मयोस्तत्त्वावगाहिनापरामृ
र्शेन जनितायां वस्तुतः साध्यवत्पक्षावगाहितया प्रमायामव्याप्तेर्लिंगोपहितलैंगिकभानिरासेनास्तिकभ्रमत्वस्याप्ययोगात् ईश्वरतादृशज्ञानजन्यत्वस्य

तिप्रसंजकत्वात्। अतएवव्याप्तिविशिष्टपक्षधर्मता तज्ज्ञानं वेत्यादिकमपास्तं यदपि व्याप्तिविशिष्टं पक्षधर्मत्वं सिद्धं द्व्याश्रयणात् व्याप्तिवैशिष्ट्यपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते
पदार्थयोरभेदेपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रेन्यत्र द्वंद्वस्मरणात् पदार्थद्वयाभेदबोधकाख्यकर्मधारयाद्युदाभेदादासीन्यत्पदार्थद्वयाबोधजनकत्वेनैव द्वंद्व
स्यभेदात् व्याप्तिविशिष्टपदस्य धर्मपरतया वा व्याप्तिवैशिष्ट्यपक्षधर्मतयोर्लाभात् नचैवं आलोकोवन्हिव्याप्यो धूमवान्पर्वत इति ज्ञानजन्येतिव्याप्तिः एक
त्रतदुभयावगाहित्वस्यात्कत्वादितिकेचित् तदप्यसत् एवमपि धूमोवन्हिव्याप्यो द्रव्यं पर्वतवृत्ति इति ज्ञानजन्येति प्रसंगात् एकरूपेण तदुभयावगाहित्वस्योक्तौ
मीमांसकमतानुपवेशात् मिथस्तदुभयोपश्लेषावगाहित्वस्य च पराभेदाव्यापकत्वात् न च तदुभयविषयत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यतास्था
लित्वमर्थः पक्षधर्मतापदानवैयर्थ्यात् व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमितितु स्यात् यद्यपत्रापि धनसमानाधिकरणाभावप्रति
योगितानवच्छेदकवन्हित्वावच्छिन्नसमानाधिकरणोधनवानित्यादिपरामर्शजन्ये व्याप्तिरधखंडव्याप्तेरप्रसिद्धेर्भ्रमानुमितेर्लक्ष्यत्वे वात्राकाशआत्मनइत्य
दोसुतरांतथातथात्वेतावत्पदार्थानांतथाविधपरस्परोपश्लेषावगाहित्वमात्रं विवक्षितं नन्वव्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषय
त्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् भवति हि धूमसमानाधिकरणात्यंताभावप्रतियोगिवन्हिसमानाधिकरणधूमवत्वेवन्ह्यभावव्यापकीभूताभावप्र
तियोगिधूमत्वे वा ज्ञाने नियमतो वन्हिव्यभिचारधीप्रतिरोधस्तथाविधधूमसमानाधिकरणोधिकं तु न तथा रासभादौ तद्ग्रहेपि वन्हिव्यभिचा
२ रग्रहात् व्यतिरेकसहकारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा नच भ्रमसंशयोत्तरप्रत्यक्षे प्रतिविशेषदर्शनस्य हेतुतामते तत्रातिव्याप्तिः तथाविध ता
निश्चयत्वेन हेतुतायाः विवक्षितत्वात् विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्वमित्युक्तत्वात्। अतएव लिंगवत्वादिलक्षणादिदेशवाक्यार्थ
ज्ञानजन्योपमितावनातिव्याप्तिः तथाविधिकार्थप्रतिसंधानत्वेन हेतुत्वात् नचोपनयार्थज्ञानजन्यन्यायार्थज्ञाने तच्छब्दसंकेतितशाब्दांतरेणवान्ययोप्यादिर्भा। २

टीकायां प्रथमसूत्रे अवयवविवेचनप्रस्तावे मिश्रैः। स्मृतीनां स्वकार्यसंस्काराविरोधिनीनाम सहभावादिति चेतन। चरमज्ञानपदस्यानुभवपद
त्वात् साक्षात्तत्त्वत्वस्याविवक्षितत्वादित्यपि कश्चित्। किंचिमाप्यविशेष्यकाऽक्षविशेष्यका परामर्शादनुमितिदर्शनात्तदुभयवैशिष्ट्याव
गाहिनिश्चयत्वेन तत्र हेतुत्वे लक्षणघटकमपि तदेव। एकतरविशेष्यकज्ञानादन्यतरविशेष्यकास्मरणात् अन्यथानियमेष्टेन स्मृतेनुभय
विशेष्यकत्वप्रसंगात्समानप्रकारकत्वेन ज्ञानस्मरणयोः कार्यकारणभावात् तत्र विशिष्टवैशिष्ट्यवकार्यकारणभावः एवं विशिष्टवैशिष्ट्यबोधादा
वप्यतिप्रसक्तिशंकापि वन्ह्यनुमितौ व्याप्यादिव्यभिचारधीविरोधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामते दानीतरां तथैव
न क्षणोपि प्रवेशात्। अत एव व्याप्यत्वस्य घभावग्रहप्रतिव्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेपि न क्षतिः व्याप्यविषयत्वेन वाजन्यज्ञानवि
शेषणीयं एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति न साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्य
ववात्तस्याहेतुत्वस्यानियमेन तु रूपनिसाक्षात्पूर्वविषयस्मृतेष्यकल्पनात् व्याप्यवत्पक्षत्वादिज्ञानेपि व्याप्तिरित्यपि परास्तं साध्याद्यनन्तर
गमात् एकोपादानेन्यानुमित्यादेवाव्याप्तिविषयिण्यां तस्यामव्याप्तिः परमविशिष्यते सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजा
तिमत्त्वविवक्षणनिरसनीया एतदभिप्रायेणैव चानुभवार्थकचरमज्ञानपदं एवं चान्वयव्यतिरेकव्याप्त्योः पृथक्प्रयोजकत्वेपि न क्षतिः
पर्वतो वन्हिव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नायाविशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतायावन्हिव्याप्यक्रय
वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्त्यविषयकवृत्तिकार्यकनिरूपितायावावच्छेदिकाज्ञानवृत्तिः समानाधिकरण्येनावच्छेदिकावाया जातिस्तद्वत्त्वं वा बोध्य

व्याप्तिभानेऽवश्यं भासमानो यस्तादृशोऽनुमित्यविषयोर्थस्तदविषयत्वमात्रं वा ग्राह्यं याकांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेता
नुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमिति वा वक्तव्यं। अनुभवत्वाजात्यनंगीकारेण तु स्मरणासमवेततद्व्यक्तिसमवेतधर्मस
मवायित्वमिति व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नायाविशिष्टपरामर्शत्वावच्छिन्नकारणताप्र
तियोगिककार्यताया समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित्परे तु पक्षधर्मतेत्यत्र पक्षताविशेषणतया च पक्ष
तासहकृतपरामर्शजन्यत्वमर्थः यथोक्तायाविशेष्याद्यभावरूपायाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्व
एकावच्छेदेनोभयजन्यत्वं च विवक्षितं। तेन बाधादिकालीनेन दैवात्प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षेतदुभयस
मूहालंबनेनानातिप्रसंगः। तदुत्त्यनुभवत्वव्याप्यजातिमत्तया च न व्याप्तिरित्याहुः। तच्चिंत्यं। तत्करणमितिन च व्याप्त्यादिज्ञानेऽन्य
ज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तदात्म्यसंबंधेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरनुगमेप्याधिक्यस्य भागादिसिद्धि
वारणमात्रप्रयोजकत्वादिति वाच्यं फलेपि हि तस्य लक्षितयव्याप्तिज्ञानादेरतिप्रसक्तत्वात् करणत्वभिन्नव्याप्त्यक्तादृशज्ञानत्वेना
द्यवच्छिन्नत्वाद्व्यतिरेकव्याप्तेरगमकतया वैयर्थ्यशंकानवकाशादिति लिंगस्य नित्यत्वेप्यनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवक
त्वेयव स्वरूपस्य नाहतत्वेति अनुमितिज्ञानाकरणकज्ञानत्वप्रत्यक्षमितिम ध्यप्रवेशात्तत्कारणस्यापि प्रत्यक्षप्रमाणात वः स्यादिवितर्किरसी

तत्रेति।त्यपि केचित्।अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुपस्थापयति अथेति।अनुमानं अनुमानत्वेनाभिमतं धूमादिज्ञानं असत्व्याप्त्युपनीतमेव वा
वासंवादेन संवादाभिमानेन संस्पृष्टवित्रस्यासतोनुगताकारस्य परमार्थसत्त्वलक्षणमात्रसाक्षिण्याध्यक्षेणानुल्लेखात् अध्यक्षमूलकविपक्षोत्प्रेक्षितत्वा
द्विसंवादः अनुमानाप्रामाण्ये तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः शाब्दोपमानयोः सुतरामप्रामाण्यमिति प्रत्यक्षं प्रमाणमित्याह इतीत्यादि
प्रमाणसाधर्म्येण प्रमाणताप्रयोजकरूपवत्त्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य वा नन्वभिहितमेव साधर्म्यदर्शनं संभावनां भावयतीति संभाव
नैव बहुशो व्यवहारहेतुरित्यत आह अनुमानमिति ननु यद्यप्यापाततोऽभ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो यतो न त्वस्य विषयबाधा
धीनतया प्रामाण्यं संभाव्यतापि परं तु प्रमाकरणत्वव्यतिरेकमत आह अपि वेति स्वतः इति न वानुगताकारासंस्पर्शिनि परमार्थसत्त्वल
क्षणसाक्षिणि स्वसंवेदनसंविदि प्रामाण्ये निर्विकल्पकज्ञानेन प्रामाण्यं संदिह्यते परं तु तदुत्तरभाविनिस्समुल्लिखितालीकानुगताकार
सविकल्पक एवेति वाच्यं।निर्विकल्पकस्य सन्मात्रलक्षणवत्त्वस्वविषयत्वप्रामाण्यावगाहित्वेनानुमानाधीनत्वोधिकत्वात्
त्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु [illegible] न संभवत्युपायाभावादित्यत आह व्याप्तीति।समीरध्यानुमानप्रामाण्यप
रीक्षाकारिणीभूतव्याप्त्युपायप्रतिपादनेनिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना साध्याभाववदवृत्तित्वस्य व्याप्त्य
वृत्तिसाध्यकस्थलेताव व्याप्तेरव्याप्त्याह साध्यवद्भिन्नेति साध्यवद्भिन्नेयः साध्याभाववस्त्विदं वृत्तित्वमर्थः कमाद्यौ संयोगाद्यभाव
स्यापि च वैमानाभावादाह साध्यवदिति भेदः साध्यवल्लक्षाभिन्नदृष्टान्तरवृत्तित्वेनाव्याप्त्याह सकलेति साकल्यं साध्याभाववत्तिसाध्येवबोध्यं।साध्यता
वच्छेदकावच्छिन्नप्र

९

शोपस्थितिद्वाराजनितशाब्दबोधेति व्याप्तिः त्युत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदादेश्यविशेषणरूपेणोपस्थापकत्व
मिति वाच्यं तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेनुप्रवेशात् निश्चयत्वस्याप्रवेशाच्च न च तथापि तत्तद्विशिष्टत्ववैशिष्ट्यज्ञानं प्रति त
तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशशाब्दबोधे प्रत्यक्षेवाति व्याप्तिः दंडी रक्तो न वेति संशयोत्तरं रक्तदंडवान् अयमिति ज्ञान
नुदयादिति वाच्यं।ज्ञानोपरमपि विशिष्टविषयोपधाने नेच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्टस्मर
णाच्च तद्विषयकगुणानां तत्र हेतुत्वेन्यूनवृत्तिज्ञानत्वस्य प्रवेशाद् इच्छादितः संस्काराच्च नुमितेरनुदयात् संस्काराद्यन्यत्वस्य गुरुत्वाद्ज्ञानत्वे
नैव तत्र हेतुत्वात् नैव परामर्शानुव्यवसायेति व्याप्तिः सामान्यतः प्रत्यक्षविषयत्वेन तत्तद्विषयप्रत्यक्षेतत्त्वेन कदाचिज्ज्ञानादिप्रत्यक्षे ज्ञानत्वावि
नाहेतुत्वेन तु यावान्नु वर्तताद्वितरत्वाद्विविषयनिष्ठाधर्मस्तेन तत्तद्विषत्वेन न कार्यकारणभावो भेदावलोकितवैत्रानिमित्तनीलितरघटतद्विषयत्वा
दिनातत्वेन तत्कार्यकारणाभावप्रसंगात्मानाभावादन्यन्योपपत्त्याश्च अथ विशिष्टस्मरणेति व्याप्तिः न चोपक्षान्यत्वेन तत्र हेतुत्वं उपेक्षात्वे हि
नजातिः चाक्षुषत्वादिना संकरप्रसंगात् आशिकत्वोपगमाद्वनापि प्रवृत्तिनिवृत्त्यजनकत्वं अजिज्ञासितविषयत्वं वा तादृशादपि स्मृत्युत्पादान्न
पि संस्कारानुत्पत्त्यो वा स्मरणं संभवे स्मृतिजनकतायां तदप्रवेशाद्‍ अनाप्यनुभवत्वेन तथात्वे संस्कारस्य तथा सकृदनुभूतस्य स्मरणोत्तरमस्म
रणाप्रसंगात् समानाकारस्यैव फलस्य नाशात् कुत्वात् सम्हालंबनादिकगोचरकमिकस्मरणानुपपत्तिः जायते च पुनः पुनः स्मरणाद् दृढतरसंस्कारः
परित्यन्यनि श्चिताव्यभिचारकरूपं गृह्यमाणव्यभिचारकेणकारणत्वकल्पनानुदयात् द्दमकनान्यत्र सामान्यस्य हेतुतावच्छेदकत्वे बीजं।अभिहितं चेतत्वय

शिरो

द्यजनकत्वस्यसंभवनाशंक्यापिधूमानुत्पादप्रयोजकत्वेनावधृतस्यवन्हिविरहस्यैवतथाविधसमूहसत्वेधूमानुत्पत्तिसामान्यंप्रतिलाघवात्प्रयोजकत्वनिर्णयि
नात्यनयात्मनसेवस्वग्रहंवन्हेर्वन्हिसमवहितस्योपादानंतत्रचनियमव्यवच्छेद्यस्यवन्ह्यसमवहितानुपादानस्यप्रयोजकेतज्जन्यत्वज्ञानपरंपरयावन्हिसमवहितोपा
दानस्यैवाप्रयोजकेतत्रतात्पर्यंयत्वन्वयव्यतिरेकानुविधायित्वस्यज्ञानमेवविशेषदर्शनतयाशंकाप्रतिबंधकंतदेवतर्कघटकंतदिदमुक्तंयदिहिग्रहीतान्वय
व्यतिरेकंहेतुमितितत्र।याद्दच्छिकस्यतदनुविधानस्यव्यभिचारित्वान्नियतस्यत्वउक्तभेदसंपादकत्वादितिवदंति।तच्चिंत्यंकेचित्तुकार्यकारणभावानुग्रहंतर्कं
व्याप्तिग्रहायद्व्यधिकरणस्यजनकत्वशंकानिरासार्थमयंतर्कः।तथाहियदिसामानाधिकरण्यातिरिक्तप्रत्यासत्त्यावन्हिजन्यत्वेसतिसामानाधिकरण्यप्रत्यासत्त्याव
न्हिजन्योन्यस्याद्वन्हिजन्योन्यस्यात्अप्रत्यासन्नस्याजनकत्वात्ताद्दशाजन्यत्वंप्रत्यासत्त्यंतरेणालिवन्हिसत्वेपिधूमानुत्पादादिनाग्राह्यमितिइदमेवनवमा
नंग्यापरेपरिष्कुर्वंतिधूमेयदिवन्ह्यधिकरणदेशानुत्पत्तिकत्वेसतिवन्ह्यधिकरणदेशापत्तिकोनस्यात्जन्योन्यस्यात्ताद्दशानुत्पत्तिकत्वग्रहस्यधूमानुत्पत्तिं
प्रतिवन्हिसंबंधाभावस्यप्रयोजकत्वेग्राह्येउपस्थितत्वाल्लाघवाच्चताद्दशसंबंधाभावस्यैवतथात्वावधारणादितितच्चिंत्यं।।मिश्रास्तु।।परंप्रतिव्याप्तिग्रहोप
योगदर्शयमानेव्यभिचारशंकानिरासहेतुत्वेनोपदर्शितितर्कमूलशैथिल्यादिशाखाद्वकंतंप्रतिव्याघातायमुपदर्शयंतमेवंशंकिष्टाः तथासतितत्रकार्याधि
तयातत्रकारणतवैवप्रवृत्तयोव्याहन्येरन्यदाहनहिसंभवतिस्वयंवन्ह्यादिकमि।तीतिप्राहुः तन्नेतितद्व्यभिचारादर्शनेव्यभिचारज्ञानसामान्याभावःयोग्य
तासंदेहेपिशाब्दादिनार्थनिश्चयात्तत्तर्कस्वरूपमित्यापिकेचित्ननुवस्तुतोव्याप्तिसत्वेतर्काभासात्प्रमाभ्रमयोरुत्पादानुत्पादाभ्यांव्यभिचारद्वत्यत
आहविशेषदर्शनेति।तथाचयथातस्यबाध्यतदभावविषयत्वेसत्यत्वासत्यत्वेतथाकर्तस्यापीतिअत्रचसत्यत्वादिसंपादकेधर्मणोबाध्यादिमत्वेबाध्यादि

मणि

२

मभ्रमसंनिकर्षेवातात्पर्यंलाघवात्।तर्कस्यव्यभिचारेणहेतुतायाःस्वयमेवदर्शितत्वात्अथविपरीतज्ञानोत्तरप्रत्यक्षेतन्निवर्तकत्वेनविशेषदर्शनस्यहेतुत्वेत
त्तर्कस्यापीतिचेदस्तुतावदापाततस्तथाप्यत्रतर्कत्वप्रामाण्यादिप्रयोजकादेवतत्रप्रामाण्यादुपमतौनतस्यापिविशेषतःकारणत्वंगौरवात्उक्तंचविशेषणज्ञा
नस्यविशिष्टज्ञानकारणत्वमतेसर्वत्रविशेष्यसंबंधासंबंधविशेषणज्ञानमेवप्रमात्वभ्रमप्रयोजकमितितत्रप्रमाणेतिइदमनादिसिद्धत्वज्ञानस्यप्रयोजकत्वमभिप्रे
त्यपराथाभिप्रायेणवाअनुमानत्वाद्व्याप्तिग्रहाधीनप्रवृत्तिकत्वात्व्यभिचारशंकेतिद्वारेणद्वारिणानान्यथासिद्धिरितिस्वाभावः।अनुमानमात्रमितिअन्वितसाध्यपदे
सर्वत्रसंभविवात्पक्षेसाध्यनिर्णयेनुमानवैकल्यात्तदुपाधित्वेनस्वव्यभिचारेणव्यभिचारोन्नायकत्वेनानुमानमात्रोच्छेदकताज्ञानमेवसाध्यव्यापकताबुद्धिविरुध्या
दित्याशंक्याह।अपिचेतिकरवन्हीतिपरमतेनेदंस्वमतेतुवाय्वादौस्पर्शादिनारूपादिसाधनेशक्यतिरिक्तविशेषणाप्रक्षेपेणावात्तद्ध्वंसकव्यापीतिप्रतियोग्य
समानाधिकरणत्वविशेषणविरहेणलाघवात्।अथसंयोगाभावस्यैवसंयोगवद्द्रव्यस्यापिहेतुसामानाधिकरण्यग्रहेप्यनुमितिदर्शनात्तत्रापितदवश्यंनिवेश
नीयमितिकृतलाघवंनन्वेवंप्रतियोगिसामानाधिकरण्याद्युपस्थितौहेतुसामानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेप्यनुमितिर्नस्यात्नचप्रतियोगिस
मानाधिकरणत्वेनाज्ञायमानायावतीहेतुनसामानाधिकरण्याद्धभावास्तत्प्रतियोगित्वावच्छेदकत्वाभावग्रहोहेतुरितिवाच्यं।।ताद्दशाभावग्रहेहिनहेतुसामाना
धिकरणाभावप्रतियोगितावच्छेदकत्वेनरूपेणप्रतियोगिसमानाधिकरणताद्दशाभावप्रतियोगितावच्छेदकत्वग्रहेतदसंभवात्नापिप्रातिस्विकरूपेणजन्मसहस्रे
णाप्यसंभवात्नापिरूपांतरेणवन्हित्वावच्छिन्नप्रतियोगिताकाभावस्यधूमसामानाधिकरण्यभ्रमेपिवन्हित्वावच्छिन्नप्रतियोगिताकाभावस्यधूमसामानाधिक
रण्यभ्रमेपिवन्हित्वावच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगितानवच्छेदकंवन्हित्वमितिज्ञानादप्यनुमितिप्रसंगात्नचहेतुसमानाधिकरणत्वे

नज्ञायमानाइतिवाच्यं।वन्हित्वेधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वभ्रमेपितद्रूपेणतथाग्रहसंभवात्‌धूमाधिकरणांतरावुपस्थितोवन्हित्वरास
भादोवताद्दृशप्रमोत्पादेपिरासभादेरिववन्हेरप्यननुमानात्‌।एवंवह्नित्वावच्छेदेनशुक्लत्वाभाववभ्रमदशायांशुक्लप्रतियोगिकावह्नित्तरप्रतियोगिकाश्च
धूमसमानाधिकरणाभावास्तत्प्रतियोगितानवच्छेदकंवन्हित्वमितिग्रहेपिमेवंप्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणप्रतियोगितानवच्छेदकत्वग्र
हविरोधिग्रहविषयत्वेनतेषांताद्दृशावच्छेदकत्वेग्रहविरोधित्वेनतद्बुद्धीनांवानुगमात्‌विरुद्धधिवसामान्याभावबोधोपिसामान्यघटितविशेषवत्ताबुद्धिस
त्वांद्विघटोनास्तीतिबुद्धौजातायामपिनीलोघटोस्तीतिबोधानुदयात्‌।तत्कस्यहेतोस्तद्विशिष्टप्रतियोगिकत्वाबुद्धिंप्रतितदवच्छिन्नाबुद्धेर्विरोधित्वात्‌।अवगाह
त्वनीलघटवत्ताबुद्धेरपिघटत्वविशिष्टतद्वत्ताअतएवावच्छेदकतत्वयोरन्योन्याभावैक्यतावाधयोरसंग्रहः।हेत्वाभासेचवक्ष्यमाणरीतिरिहाप्यनु
संबंधेया।यदिचसाध्यतावच्छेदकत्वाभावप्रतियोगितस्यनवच्छेदकत्वादिग्रहान्नानुमितिस्तदाताद्दृशावच्छेदकत्वादिग्रहाविरोधित्वमपिनिवेशनी
यं।अन्योन्याभावस्यव्याप्यवृत्तित्वपक्षेसुतरांविशेषणदानमिति।सत्यंतथापिअन्योन्याभावप्रतियोग्यवृत्तित्वस्यैवविशेषणत्वेनचप्रतियोगिता
वच्छेदकसंबंधप्रवेशानुधावनमतोलाघवमितियथाश्रुतग्रंथानुरोधिनः।अपरेतुअन्योन्यात्यंताभावगर्भव्याप्त्यारकत्वरायहेप्यन्यतरज्ञानादनुमितेरा
नुभाविकत्वात्तदुभयज्ञानमेवहेतुः।इंद्रियसंयोगादिवद्विशेषेवकार्यकारणाभावान्नव्यभिचारः।यत्तुयद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थिताभावाधर्मि
णिगृह्यमाणःसाध्यवत्वबुद्धिविरुद्धधिद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनोग्रहस्यविरोधित्वेनवाव्याप्तिबुद्धयोनुगमनीया।प्र
तिबध्नीतश्चसाध्यतद्वदत्यंतान्योन्याभावेग्रहेसाध्यवत्ताबुद्धिकेवलोनचयिस्छत्वन्तभ्रमस्तुस्येवतद्ग्रहस्यकथंचित्प्रसिद्धिः।तच्चिंत्यं।साध्यतावच्छेदकसाधनसमाना

शंकानिवर्तकत्वं।अन्यथायदिवह्निस्तच्छून्यान्यतरजन्योनस्यात्जन्योनस्यादित्यादेरपितथात्वापत्तेः।तथापर्यवसायितावच्छेदकविद्विशेषेतोव्याप्त्यासामान्यतेपिकचित्पक्षधर्मतावच्छात्
तत्संपन्नत्वेयत्रवन्यसमवहितद्वह्निताजन्यत्वेनपक्षोविशेष्यःविशेषणवत्वेनोपस्थितेविशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलंबित्वात्‌तथोपस्थितिविरोधितावन्हेरित्यादिशंका
द्वयमप्येनिरसनीयंवस्तुतोवन्ह्यजन्यमपिवन्हिसमवहितजन्यंसंभवतीतिवन्हिजन्यत्वपर्यवसितंवन्हिसमवहितजन्यत्वंवाच्यं।तथाचघटादौव्यभिचारवारणायापद्यकोटि
प्रतियोगिविशेषणार्थकंसत्यंतेमजन्यजन्येजनांतरीयकवन्हिकेव्यभिचारवारणायजन्यइतिःतदर्थश्चवन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्कारणकोनस्या
दितिपर्यवसितोर्थः।यत्तुनांतरीयकवन्हिकेव्यभिचारवारणायेपादककोटावेवविशेषणंसत्यंतार्थःसचवन्ह्यघटितस्तत्सामग्र्यजन्यत्वमितितत्तन्न।प्रातकदसिद्धेः।अत्रद्वि
तीयशंका।इष्टापत्तिपर्यवसितात्‌तीयापुनरापादकाद्यप्रसिद्धिपर्यवसायिनीअवन्हेर्वन्हिश्चन्यात्‌तदुपादानमितिकारणत्वसुत्पत्यादितितदीयकार्यप्रयोजकताज्ञानपरंताद्द
शान्वयव्यतिरेकानुविधानबोधपरंपरावाअयेतन्नमपिस्वीक्रियोपदंतत्परमेवकृत्यादेःशंकाप्रतिबंधकतत्वमानाभावात्‌कारणतायहेतत्रकालीनत्वाच्च।यद्यपिचेतावता
धूमवृत्वावच्छिन्नं प्रतिवन्हेर्जनकत्वेनायातित्रणारणिमणिन्यायेनवैकल्पिककारणतायामपितथात्वंसंभवात्‌तथापिविशेषाणांकार्यकारणभावग्रह
स्तर्केणतद्विरोधशंकायामपिनीतायांजायमानःसामान्यव्यभिचाराभिर्णयानुगतागुरुविशेषरूपांतरानुपस्थितिलाघवप्रतिसंधानादिविशात्सामान्यतएवतप
रिच्छिन्नत्तिप्रामाणिकोचतथैवान्वयव्यतिरेकोफलबलेनलाघवज्ञानादिशून्यायाएवसामान्यव्यभिचारशंकायाःप्रतिबंधकत्वंकल्प्यते।अपरेतुधूमत्वावच्छिन्न
स्यवन्ह्यजन्यत्वेनजन्यत्वविशिष्टस्ययथाश्रुतवन्ह्यसमवहिताजन्यत्वस्यव्यतिरेकएवापादनीयः।तच्चोक्तन्यायेनतत्कारणकलापजन्यत्वग्रहेणतद्व्यतिरेकज
न्यत्वशंकानिरासात्‌वन्हिविरहेपिनिरतिशयस्यैवताद्दृशसमूहस्यधूमजनकत्वसंदेहस्यनतथाविधाधूमानुत्पाददर्शनेनैवायोगात्‌ताद्दृशस्यैवच्छिद्वन्हिकत्वेतरदासा

दात् जातिशून्यमेयव्यक्तौ समवाये नवर्तमानस्याप्रसिद्धेः एतेन ग्रहो व्याख्यातः एवं तथात्वे त्यंताभावगर्भलक्षणमपि दुर्वचनं तथाहि प्रतियोग्यनधिकरणीभूतत्व
द्वधिकरणनिष्ठात्यंताभावेत्याधिगर्भमव्यापकमेव संयोगादिसाध्यकद्रव्यत्वादौ स्वाधिकरणं यत्किंचिद्द्रव्यं। तद्वृत्तिप्रतियोगिताकात्यंताभावप्रतियो
गितानवछेदकसाध्यतावछेदकावछिंनसमानाधिकरणहेतुत्वमित्यत्रापि पूर्ववद्गुणःस्यंदत्वा जातिमान्मेयत्वादित्यत्राति व्याप्तिः। एवं स्वप्रतियोगिनिष्ठाधेयत्वा
निरूपहेत्वधिकरणवृत्त्यत्यंताभावप्रतियोगितानवछेदकसाध्यतावछेदकावछिन्नसमानाधिककरणहेतुत्वमित्यत्रापि तु त्पन्निकालावछेदेनजन्यानां द्रव्याणां अज
न्यानां च प्रलयावछेदेन संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे संयोगसाध्यकद्रव्यत्वकालपरिमाणे च हेतावव्याप्तिरितिदिगति कृतं पल्लवितेन॥ अत्र वदंति॥ ॥
साध्यसमानाधिकरणयत्संबंधावछिन्नाभावप्रतियोगितावछेदकत्वव्यापकसाध्यसमानाधिकरणतत्संबंधावछिंन्नाभावप्रतियोगितावछेदकत्वस्वसमानाधिकर
णाः सर्वेयद्धर्मावछिंन्नसमानाधिकरणाः तद्धर्मावछीन्नसामानाधिकरण्यं साध्यसामानाधिकरण्याभावव्यापकतावछेदकस्वसमानाधिकरण्यासामान्याभाववत्त्वं वा
व्याप्तिः। अत्र च साध्यतावछेदकसंबंधेन साध्याधिकरणं हेतुतावछेदकसंबंधेन हेत्वधिकरणं तद्वृत्तिद्वयं च स्वेनैकेन संबंधेन विशेषणवाबाध्यप्रसंगात् सामान्यलक्षणां व्यु
त्स्थापयितुमाह व्याप्तिग्रहश्चेति। केचित्तु समानाधिकरणयोरेव व्याप्तिरितिपक्षे पर्वतीयधूमे वह्निव्याप्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहं विना सच सामान्यलक्ष
णां विना नेति कथित व्याप्तिविशिष्टत्यादिलक्षणायोद्भावितेषीत्याहुः। अत्र च सामान्यंलक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यलक्षणं निरूपक
यस्या इत्यर्थे तु तज्ज्ञानं तत्राद्यमाह। सवेंद्रियेति। इंद्रियेण संबंधं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादित्यर्थः। विशेषणतेत्यत्र भावार्थो न विव
क्षितः। तत्र विशेषणं स्वं यस्येति बहुव्रीहिर्वा संबंधपदस्यैव वा परंपरासंबंधः तत्संबंधविशेष्यकज्ञानप्रकारोर्थः। तथा च सैव विलक्षणेत्यर्थः। अत्र च वह्नि

२२

रिंद्रियस्य लौकिकः संबंधो ज्ञानस्य तदिंद्रियजन्यत्वं च नियामकं। एवं चाणुत्वेन यत्किंचिदनुपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदंति। एवं धूलिपटले धूमभ्रमे तत्र च व
ह्निव्याप्तिग्रहे तत्रासता धूमत्वेन धूमेषु व्याप्तिग्रहाद्धूमदर्शनात् वह्न्यनुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् किंच धर्मिणि दोषवशात् नयनेनागृह्यमाणेन स्मरणप्रकारीभवता सा
मान्येन गृह्यमाणेन स्मरणप्रकारीभवता सामान्येनागृह्यमाणेन च लौकिकसंनिकर्षविगमेपि चाक्षुषापत्तिरिति परास्तं सामान्यं च सखंडाखंडभेदेन द्विधा सखंडं चाखंडमेव परंपरासंबंधं प्रत्या
सत्तिः येन संबंधेनेंद्रियसंबंधे सामान्यं ज्ञायते तेन संबंधेनाधिकरणानां सा प्रत्यासत्तिरिति न नु यत्र नानाधिकरणप्रत्यासन्नएकव्यक्तिर्घटादिस्तत्प्रागभावादिर्वा नित्यः प्रत्यासत्तिस्त
त्र तदभावः दशायां प्रत्यासत्त्यज्ञानादुदयप्रसंगादिति चेन्न तत्रापि तद्व्यक्तिद्वारा प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वात् एतदस्वरसेनैव द्वितीयं पक्षमाह। अतिरिक्तेव वेति। अतिरि
क्तइंद्रियसंबंधे तादृशसामान्यज्ञानात्मिका अलौकिकानुरोधात् सामान्यज्ञानप्रत्यासत्तिरपेक्षणीया च तदिंद्रियकरणकतद्धर्मवत्त्वबोधसामर्थ्यं तेर मतएवांधतमसे सौदामिनीसंपादज्ञानेनैपि
द्रव्यप्रत्यक्षे च रमनचाक्षुषाण्यखिलद्रव्यसाक्षात्कारसंतानइति तु न व्याः इदं च धर्मविषयकं ज्ञानं धर्मिणां प्रत्यासत्तिः इतरानु यद्विषयकं ज्ञानं तत्स्यात् एव सुरभिचंदनमित्यादौ सौ
रभत्वादेरपि भानमिति ततः स्मृतासेति धूमसमानाधिकरणात्यंताभावाप्रतियोगिवन्हिसमानाधिकरणवृत्तिधूमत्वं वन्हिमदन्यावृत्तित्वं वन्हिसंबंधितावछेदकरूपवत्त्वं वा व्याप्तिः ए
कैव च सा सर्वधूमसाधारणीतिभावः। व्याप्त्यननात्वे तु पर्वतीयवन्हेरसंनिकर्षेण तत्सामानाधिकरण्यग्रहायोगोन्यदीयवन्हिसमानाधिकरण्यस्य तत्राभानांगीकारे भ्रमत्वापत्तिरिति
द्रष्टव्यं। गवादिपदे घषीतिरस्त्यनुत्तिवशक्यस्मरणहेतुहेतुमाचाक्यार्थबोधः। न चैवं जातिशक्तिवादविरोधः। जातेरेव व्यक्तौ शक्तिः परं तु जातिविषयत्वेनैव ज्ञाता व्यक्तिं स्मारयति अ
नुभावयति चेति तदर्थादित्ति वक्ष्यमाणत्वादतद्गुणसंविज्ञानबहुव्रीहिणा पश्वादिलिङादिपदाभिप्रायेण परीत्यैवेति कश्चित्। विशेषणज्ञानसाध्यत्वेति न च पक्षतावछेदकज्ञानज
न्यतया सिद्धसाधनं यद्वह्निविशिष्टज्ञानं तन्न धीसाध्यामिति सामान्यव्याप्त्यादरात् अभावत्वप्रतियोगित्वयोरनुपस्थितयोरप्रकारत्वात् वह्निविशिष्टज्ञानत्वेन वा तत्ज्ञानजन्यत्वसाधनाद्वावि

शिष्टवैशिष्ट्यात्याद्यस्युपगमवादः वस्तुतो विशेषणतावच्छेदकादीनां युगपदिंद्रियसंनिकर्षात्तादृशं प्रत्यक्षं अनुमित्यादिस्तु तादूप्येण व्याप्त्यादि यहात् अत एवानवव्यतिद्रव्य
दिविशेषणतावच्छेदकानुमित्यादौ न तज्ज्ञानार्थं सामान्यलक्षणादरः। अस्तु वा दंडी त्यादौ प्रत्यक्षे दंडत्वादिना दंडसंयोगवानित्यादौ वदंडसंयोगत्वादिनायत्किंचिद्व्यक्ति तानं कार
णं दृष्टं ताभावादिति विशेषणज्ञानत्वेन हेतुत्वस्य विशेषणज्ञानादिकारणत्वापत्त्यामानाभावेन त्वनिरस्तत्वादिति एतेनास्तु विशेष्यज्ञानमपि कारणं जन्यतावनिर्विकल्पकमपि सा
मान्यलक्षणया सार्वज्ञापत्यात् स्यास्तदजनकत्वे तु तत एव बाधकान्न तत्कारणमिति निरस्तं प्रसिद्धधूमइत्यादिधर्मिज्ञानस्य संशयहेतुत्वानंगीकारेपि संशय एव धर्मिभानार्थं स्वीकार्य्या
धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे त्वविवादात् तद्धर्मप्रकारकं ज्ञानस्य तद्धर्माश्रय प्रत्यासत्तित्वोपगमात्॥ ॥अत्र वदंति॥ ॥प्रसिद्धधूमे धूमत्वेन सिज्ञानं तस्य मते नवाऽ
द्यसंशयोः सिद्धः द्वितीये तु धूमत्वावच्छेदेन व्याप्तिग्रहस्येव तद्विरोधितया सनानुपपन्नः कथमन्यथा पृथिव्यादिरूपेषायुत्वाभावव्याप्यतानिर्णये पि रूपं वायुत्वाभावव्यभिचारि न वेत्यादि संशयः न वा
तिरिक्त संभावनया तथाविशेषतश्चायश्चितानामतिरिक्तानां विशेषदर्शनाक्रांततयातिरिक्तांतरोपस्थितये वश्यं करणीये ति वाच्यं यतो रूपेषु नातिरिक्तत्वसंभावना तेषु विशेषदर्शनात्
नाप्यतिरिक्तेरूपत्वसंभावना रूपान्यवृत्तिरूपं द्रव्यादयोरसादयश्च न रूपं प्रसिद्धं रूपभिन्नेयद्रूपभिन्नं द्रव्यं रसादिवा तत्सर्वं न रूपं रूपत्वाभाववेत्यादि विशेषदर्शनात् तस्याप्ययोगात्
तदानीं चोक्तसंशयस्य सर्वज्ञानानुपत्तिवसिद्धत्वाच्च अतिरिक्त संभावनाया गौरवेणाप्रयोजकत्वाच्च। तस्मात्तत्रैव धूमेरूपेवा धूमत्वरूपत्वाद्यवच्छेदेन व्याप्तेग्रहात् व्यभिचारसंशयो नायुक्त न
यत्तु सामान्याभावाभावार्थं सांगी कार्यता विना सकलप्रतियोगिज्ञानासंभवादिति। तन्न। नन्वभावस्य ज्ञानमाने लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तत्त्व सामान्यलक्षणया द
दंडत्वादिना दंडाभाने व्यभिचारात् मानाभावाच्च। अत एवेदं त्वादिनोपस्थिते तमसि भावत्वाभावसंशयः तेजोभावत्वेनोपस्थिते तदयोगात् प्रतियोगिविशेष्य तत्ज्ञानं तु विशिष्टवैशिष्ट्यावो
धमर्यादाना तिशेते सकलप्रतियोगिविषयत्वं तु तस्यासिद्धं प्रतियोगिज्ञानस्य हेतुत्वेपि प्रतियोगितावच्छेदकत्वविशिष्टयत्किंचित्प्रतियोगिज्ञानादेव तत्संभवात् यावत्प्रतियोगिज्ञानत्वे गौर ७२

धिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वया ही साध्यतावच्छेदकावच्छिन्नसाध्यवत्वे व साधनसामानाधिकरण्यान्योन्याभावप्रतियोगितावच्छेदकत्वावगाहीयोय
हा स्तद्विरोधित्वं साध्याभाववद्वृत्तित्वसाध्यवदन्यवृत्तित्वोभयावगाहि ग्रहविरोधित्वादिकं वानुगमकं वाच्यं प्रसिद्धिः पूर्ववत् अधिकं द्वैत्वाभासवक्ष्यमाणरीत्या बोध्यं।
ग्रंथस्तूपलक्षणपरः। अनौपाधिकत्वमात्रव्यवच्छेदाय यद्वक्ष्यति अनौपाधिकत्वं न तल्लक्षणमितीति वदंती। व्यभिचारज्ञानस्य व्याप्तिहेतुत्वाद्व्याप्तिग्रहप्रतिबंध
कग्रहविषयत्वेन व्यभिचारस्याभासत्वं सोपाधित्वज्ञानं तु न साक्षाद्व्याप्तिधीविरोधिविरोध्यविषयत्वात् किं तु व्यभिचारधीद्वारा वक्ष्यते वानुमितेस्तत्कारणस्यज्ञा
नस्य वा साक्षाद्विरोधिन एवाभासत्वमिति निरूपाधित्वज्ञानं तु न व्याप्तिधीहेतुः मानाभावात् तथात्वेपि रासभादौ त्वायोगाच्चेतिदं पुनरिहावधेयं। यदन्योन्याभावस्याव्या
प्यवृत्तित्वे प्रतियोग्यवृत्तिविशेषिततद्घटितलक्षणस्य संयोगादिमाध्यकव्यभिचारि प्यतिव्याप्तिः ध्रुउपाधेः संयोग्यन्योन्याभावस्य केवलान्वयित्वात् अथ व्याप्य
वृत्तिसाध्यकेस्वव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः अव्याप्यवृत्तिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यताभावेन तादृशरूपाव
न तादृशाच्छिन्नविशिष्टप्रतियोगिताकान्योन्याभावेन वासमम सामानाधिकरण्यमिति चेत् स्मृतिसंस्कारजन्यज्ञानविषयत्वादिके वलान्वयिसाध्यकेषु का गतिः। अथा
स्वाधिकरणयत्किंचिद्व्यक्ति वृत्तिधर्मावच्छिन्नप्रतियोगिकान्याभावप्रतियोगितावच्छेदकत्वसाध्यवत्वकत्वं यद्धर्मविशिष्टयत्किंचिदधिकरणवृत्तिधर्मावच्छिन्न
प्रतियोगिताकन्योन्याभावप्रतियोगितानवच्छेदकत्वसाध्यवत्वकत्वे सति तद्धर्मविशिष्टत्वं वा सतीति चेन्न अत्र किंयथा कथंचित्संबंधेन तदधिकरणवृत्तित्वं वि
वक्षितं। साध्यतावच्छेदकसंबंधेन वा। आद्ये गुणः स्पंदत्वादित्यत्राति व्याप्तिः। गुणत्वस्य स्वरूपसंबंधेन स्पंदवृत्तितया तदत्तस्यस्पंदनिष्ठतादृशान्योन्या
भावप्रतियोगितानवच्छेदकत्वात् द्वितीये न जातेः साध्यत्वेन मेयत्वादामतिव्याप्तिः। जातिमन्मेयव्यक्तिनिष्ठतादृशान्योन्याभावप्रतियोगितायाः जातिमदेनानवच्छे

र्वे धुनर्ष्टोदिगुनावेतिव्यवहारप्रसंगादिति परास्तं। कर्तरि विहितेन वा ख्याते न कृतावायथायथामाश्रयत्वप्रतियोगित्वलक्षणं कर्तृत्वं आश्रयप्रतियोगिरूपथक् कर्ताभिधीयते
कार्यानुत्पाददशायां वा भावधीः समवायिकृमत्यंताभावमवगाहते न च प्रतियोगिसमवायिनि समवायावच्छेदेनात्यंताभाववत्तो मानाभावः भावनिविनष्टे वा पटे इह कपा
ले घटो नास्तीति प्रत्ययात् न ह्ययं घटप्रतियोगिकमभावमवगाहते। यत्किंचिद्घटवत्यपि ताहृशप्रत्ययप्रसंगात् परंतु घटत्वावच्छिन्नप्रतियोगिताकं। न च ध्वंसप्रागभा
वौ तथा संभवतो वा तत्र काले ततः पूर्वं परतश्च बहूनां घटानां नष्टत्वादुत्पत्स्यमानस्यैत्वाद्व स्मथैव कपालादौ कथं पटध्वंसादिशून्यताबुद्धिः अत्यंताभावस्य ध्वंसा
द्यविरोधित्वादिति चेन्न तत्तदधिकरणस्वरूपादितिरिक्तादेवानुगतताभावाद्वा इहेदानीं घटप्रागभाव इति प्रत्ययालोकानां तथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्या
दिलक्षणप्रत्यक्षवलेन नाशोतिरिच्यतां न तु प्रागभावः पूर्ववत्तत्पूर्वत्वादिव्यवहारस्यातीतकालवृत्तित्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयकृ एव
स्तदुःखात्यंताभावस्य स्वस्मिन्नुत्तरकालानुवृत्तिंदुःखसादनं ध्वंसं वा समुद्दिश्य यक्रियाविशेषे प्रवृत्तिरस्तु मानंतरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्तंते तेन
तदुत्पत्त्यैव तत्सिद्धिः उत्पन्नपुनरुत्पादप्रसंगस्तु कालाघवात् कार्याद्विः प्रतिबंधकत्वेनापि निरसनीयः। तदुत्पत्तेश्च महाप्रलयानंगीकुर्वतां मते स्वाधिकरणसम
यध्वंसानधिकरणसमयसंबंधः तदुक्तं अथ ध्वंसस्य लक्षणयोगस्य क्षणयोगो जनिमत इति क्षणः समयः तदंगीकारे तु कश्चिदपि यदीयसमयसंबंधेयत्समयवृत्ति
ध्वंसप्रतियोगित्वं नास्तीति तस्य तत्समयसंबंधः तदधिकरणक्षणावृत्तित्वव्याप्यवृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वे वक्षणत्वं स्वस्ववृत्तिध्वंसप्रतियोग्यना
धारत्वं स्ववृत्तिध्वंसप्रतियोगिप्रारेकत्वं कश्चिदपि यदीयसमयसंबंधेति यौगिकयावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावदभावविशिष्टसमयत्वं स्वस्वपूर्ववर्ति
यावत्पदार्थविशिष्टत्वं वा स्वपूर्वत्वं स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियोगित्वं जन्यमात्रस्यैवकालोपाधित्वाददोषः योयत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य

१२

वृत्तित्वमुत्पत्तिरिति त्यपि केचित् इति चेन्नैवमपचीयते किंचदस्माकमित्यपि केचिन्नो वर्णयंति। अथ पटस्य स्वाधिकरणेषु तंतुषुत्पत्तिवारणाय सहस्रादीनां तंतूनां तत्र
तुत्वेन तत्पटजनकत्वं वक्तव्यं तथा च लाघवादेक एव प्रागभावः कल्प्यते स च स्वाश्रय एव प्रतियोगिजनक इति नातिप्रसंगः इत्यं चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनक
त्वाद्वितंतुकेपि तत्सिद्धिरिति चेन्न त्रितंतुके वा तंतुषूत्पन्नेषु संयुक्तेषु च तत्पत्तित्पटोत्पत्तिप्रसंगः तावत्तंतुवृत्तेः घटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न कार्यानुत्पादस्य वि
नाकारणविरहमनुपपत्तेः उपगमात् सामग्रीसत्वे ग्रिमक्षणे कार्यसत्वस्यावश्यकत्वाच्च तत्पटप्रागभावाश्रययावत्तंतुत्वेन तत्पटजनकत्वमिति चेन्न अवच्छेदककोटौ प्रागभाव
स्य प्रवेशाप्रवेशयोः कारणत्वप्रमाणाभावः परस्परासंयुक्तेषु च कतिपयतंतुषु पटो जायेत नन्वतत्प्रागभावव्याप्ययावत्संयोगानामपि जनकत्वं कतिपयतंतुसंयोगेष्व
तीतेष्वनागतेषु वा पटानुत्पत्तिप्रसंगात् तत्पटप्रागभावमपेक्ष्य च स एव पटो लब्धीयान् यावद्वा निरूक्तश्च एतेन द्वित्वाद्युत्पत्तिर्व्याख्याता इति परे पुनरिहेदानीं घटध्वंस इ वि
वदिहेदानीं घटप्रागभाव इति साधारणमेव लोकानां प्रत्यक्षं कल्प्यं तत्तद्बले न प्रागभावसामान्यलक्षणं व्यवस्थापयतो वर्णयंति अव्याप्यवृत्तेः कार्यस्य द्वि
तीयलक्षणधारावहनस्थले च प्राथमिकनिर्विकल्पकस्य तदुत्तरक्षणे वोत्पत्तिवारणाय एकावच्छेदादिना कार्याभावस्योत्तरज्ञानाभावस्य च कारणत्वं वक्तव्यं।। तथा च
लाघवात् प्रागभावस्य तत्वं कल्प्यते स्वभावाधीनत्वाच्च स्यादेशिकत्वाद्यादेशिकत्वनियमः संयोगादिनामिति अन्ये तु सर्वत्र तत्तत्संख्याविशेषाणां विशिष्य हेतुत्वोपगमेन
व तत्र द्व्योत्पादनियमसंभवेपि युगपदुत्पन्नेषु नित्येषु च त्रित्वाद्युत्पत्तिनियमकत्वेन प्रागभावः कल्प्यत इत्याहुः यत्तु ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहे न तु द्वेषस्थितिं
विनान्वेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारो योग्यविशेषगुणयोगपद्यस्यात्मनि षेधात् अतो ज्ञानानंतरसाक्षात्कार एव ज्ञानत्वादिना इच्छादिजनकज्ञानादिकं गृह्य
ती सुपेयत इति तत्र पौर्वापर्यापरिचये धर्मिस्वरूपग्रहेपि कारणत्वग्रहासंभवादिच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारज्ञानेच्छासामान्यव्यतिरेकनियतेच्छे

तिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्याभ्युपेयत्वात् कृत्यनुत्पादस्थले ज्ञानेच्छयोः कृत्यंतरमिति भावः त्योश्च समूहालंबनसाक्षात्कारस्य स्मरणे न ज्ञानानुमानस्य
वसंभवात् विंशत्यं गुरुत्वावच्छेदे न युगपद्विंशतिप्रयत्नोत्पादवच्छिन्नाकृतिकाले ज्ञानोत्पादे ऽविरोधात् भोगत्वे न गौनिष्ठाभावप्रतियोगित्वेन समवेतत्वेन विशेषितम
विशेषितं वा गमेतेरा समवेतत्वं व्याप्यता वच्छेदकं न तु स कल्लोगोत्वनित्वविशेषितसामान्यलक्षणया गृहीतुमशक्यत्वात् न तु समानविषयत्वेनापीति। समादे तत्व
समानप्रकारतामात्रस्य प्रयोजकत्वे क्वचिद्रजतत्वप्रकारिकेच्छा क्वचित्त्वेनेति नियमो न स्यात् तादृशप्रकाराश्रयएव च तदुत्पादो त्यगमे ऽप्रथमरजते रजतत्वप्रकारिके
अनुपस्थिते वा संसर्गाग्रहोपि न नियामकः वस्तुतो संसर्गाग्रहमपेक्ष्य लघीयस्तद्विषयतामात्रस्यैव नियामकत्वमुचितं। सामान्यतस्तदिच्छायां व्यवस्थिते हेतुभाव
स्यतद्विषयकज्ञानस्यतो प्रकारत्वमवच्छेदकं कल्प्यते लाघवात् अस्तु वा समानप्रकारत्वेन व्यवस्थिते कार्यकारणभावे ऽतिप्रसंगभंगाय सामानाधिकरण्यमिव समानवि
षयत्वमेव प्रत्यासत्तिः संसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिनिवेशोपि लघीयान् कारणयथार्थत्वाथी न स्वकार्यस्य तथात्वविधो विशेषः
एतेन रजततत्वप्रकारकेच्छायां तत्प्रकारकज्ञानं संवादिन्यां तस्यां दोषाभावसहितं विसंवादिन्यां तु उपस्थितरजतभेदाग्रहसहितं हेतुरिति परास्तं। विसंवादिन्यामपि संवा
दिन्यामुपस्थितरजतभेदाग्रहस्यैव हेतुत्वोचित्याद् दोषाणां रजतभेदग्रहप्रतिबंधकानामभावमपेक्ष्य लघुत्वात्॥ अत्राहुः॥ सिद्धएव सुखदुःखत्वेन रूपेणेच्छा
लाघवात् तत्प्रकारकेच्छायां तत्प्रकारकावच्छेदेनेसिद्धत्वाज्ञानमेव हि विरोधि न च तत्प्रकृतितत्त्वेइच्छोत्पन्नेस्तथाप्यनंगीकारात् कथमन्यथाप्रोषितस्याज्ञातकांतम
रणस्य तत्कांतावलोकनादाइच्छा ज्ञातावलोकनादीनां सिद्धत्वज्ञानात् अतिरिक्तस्य वासत्वादित्यादि बहुतरमूहनीयं॥ अथ सिद्धत्वनिश्चयाभावापेक्षया लाघवाद
सिद्धत्वज्ञानमेव हेतुः न च सिद्धत्वेनाज्ञाते तत्संभवतीति असिद्धत्वज्ञानार्थं सामान्यलक्षणति न विशेषरूपावच्छेदेनासिद्धत्वेनाज्ञातएव सामान्यरूपेणासिद्धत्वग्रहसंभवात् तदेक

९९

वेणाहेतुत्वात् न च तदभावबुद्धौ तज्ज्ञानत्वेन हेतुत्वात् यावत्प्रतियोगिज्ञानस्य हेतुत्वमर्थायातं। मानाभावात्॥ ध्वंसप्रागभावात्यंताभावाः प्रतियोग्यादित्रयप्रतियोगिकाः द्वयाग्रहेप्येकग्रहा
देवग्रह्यं तदिति अभ्युपगमाच्च। अंधकारस्तु तेजोविशेषसामान्याभावो नाभावसमुदायः यावत्तदभावनामिकत्रासंभवात् अननुगमाद्गौरवात् तेजोविशेषत्वादिज्ञानस्य तेजःसामग्र्याश्च विरहे
तेजोविशेषात्यंताभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च प्रागभावप्रत्यक्षे प्रतियोगित्वप्रतियोगिवृत्तिघटत्वादिप्रकारकज्ञानसाध्ये न प्रतियोगिज्ञानमपेक्षते। अथ घटो भविष्यतीति प्रत्यक्षं प्रति
योगिविशेषितं प्रागभावमवगाहते न न प्राचीनास्तप्रतियोगिनस्तत्प्रतियोगिकत्वावगाहने भ्रमत्वं न बाधाते घटे प्रत्यासत्त्यंतरमस्ति अतः सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं स्मृतेरतत्तदा
बते च चरमकारणरूपसामग्री व्यंगप्रागभावो वाच्यः अन्यदा तदप्रत्ययात् तस्याश्च स्वरूपसत्त्याः स्वरूपेणवाज्ञातायाः तथात्वे ऽतिप्रसंगात् व्याप्यत्वेनागृहीतायास्तत्वं वाच्यं तथा च तद्धेतुकप्राग
भावस्यानुमितित्व तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोगाच्चेति वाच्यं यथा दृशकारणकालापानंतरं कार्योत्पादो दृष्टः तद्बुद्धेरेव व्यंजकत्वाभ्युपगमात् अनुयोगिताविशेषादिरूपप्रा
गभावत्वादेः प्रतिबिंबप्रतीतौ तादृक्रूपेणानुमानसंभवाच्चेति चेत् भविष्यत्वं न हि वर्तमानप्रागभावप्रतियोगित्वं ध्वंसो भविष्यति घटो भविष्यतीति प्रत्ययप्रसंगात् किंतु तत्त्यत्वे भविष्य
तीत्यादेः समानार्थकत्वात् वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं वा तत्त्वं न चेदमध्यक्षउत्पत्तेरतींद्रियत्वात् इहाद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तेर्देशविशेषः कालवि
शेषश्चाधिकरणत्वेन प्रतीयते न तु प्रागभावस्य उत्पत्तिमतो वा। अत एव कलापनाशजन्यघटनाशस्य घटाद्यात्मकप्रागभाववत्यपि तत्र कपाले नेह घटध्वंसो भविष्य
तीति बुद्धिः न वा भवेत्स्वः समुद्यप्रांगणे परश्वो गमिष्यतीमैत्रे प्रांगणे परश्वो भविष्यतीति धीः॥ अत्र च नो धातुनोत्पत्तिः प्रत्याय्यते प्रत्ययेन तु च धात्वर्थनिष्ठां तादृशप्रतियोगित्वं
तादृशकालीनत्वं वा नंक्ष्यतिनश्यतिनष्ट इत्यादौ प्रत्ययेन यथायथमनागतावर्तमानातीतावोत्पत्तिः तस्यामेव च कालविशेषादिर्विशेषणत्वेनान्वेति एतेन श्वो भाविनाश
के परश्वो नंक्ष्यतीति नेक्ष्यश्च न स्यतीति व्यवहारः स्यात् नस्याश्च नाशस्य विद्यमानत्वान्नष्टइत्यादिः न च तत्रातीतकालासंबंधित्वं वर्तमानत्वं वा निष्ठादेरर्थः। सिरविनाशेपि प्र

धर्मिण एव व्यापकत्वमिति तु परमार्थः। अत एवायं पर्वतेतरान्यत्वादिति साधु संगच्छते इतरथा तु व्यापकाभावस्येव व्यापकवदन्योन्याभावस्यापि गमकत्वमाश्रित्य
संगमनीयं व्यतिरेक इति यद्यपि व्यापकाभावमुद्रया गमकत्वे तथा वैयर्थ्यं न दोषाय तथापि वास्तवं तथा वैयर्थ्यशून्यत्वमेव विशेषणदेयमिति लोभाभावः यत्
ययोर्व्यतिरेके व्याप्तिस्तयोरेव व्याप्यव्यतिरेकिणोरन्वयो व्याप्तिरिति नियमः। इह व्यर्थविशेषणतया व्यतिरेकव्याप्त्यभावादन्वयेपि न तथा अतः साध्या
व्यापकत्वान्नायकमुपाधिरिति भावः इति। तत्रैव हेतुकत्वशरीरशाहेतुकत्वयो व्यभिचारात् एवमपि संयोगादौ केवलान्वयिनि साध्ये पक्षे तदा व्याप्तिद्रव्यस्याग्रव
स्तुगत्येति तथा च पक्षे साध्यवति तदितरत्वं अ साध्यव्यापकं तद्द्वितेन बाधोन्नीतत्वादुपाधिरेवेति भावः। यद्विषयतया ज्ञानस्य प्रतिबंधकत्वं तदेव प्रकृ
ते उपाधित्वं वाच्यं नान्यदनुपयुक्तत्वात् तत्र इदं रूपं तदा तद्वृत्तया पक्षेतरस्यापि यादृशादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह अस्ति उपाधिमात्रमिति सत्प्रति
पक्षोन्नायकतया दूषकत्वमिति मतं इतरथा तु पक्षावृत्तेरुच्छेदाबाध्य विपक्षेति विपक्षव्यावर्तकधर्मांतरविशिष्टपक्षेतरत्ववारणाय निषेधद्वयगर्भतया विपक्षा
व्यावर्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वशालित्वं तत्त्वं विवक्षितमित्याचक्ष्य पक्षेतरस्योपाधित्वमनंगीकुर्वतस्तन्मतेनातिव्याप्तिरभिहितावस्तुतो दूष
कताप्रयोजकरूपवतस्तस्यानुपाधिताभ्युपगमस्तद्वारणाय च विशेषणोपादानद्वयमपि न युक्तमित्यभिप्रायवानाह तथापीति तावन्मात्रस्य साध्यव्यतिरेको
न्नयनक्षमसाध्यव्यापकतामात्रस्य दूषकत्वात् उदीपान्वयेनापूर्यागित्वाज्जातित्वादिति तदुत्तरस्येत्यादि उपाधित्वाभावापीति उपाधित्वानंगीकारपीत्यर्थः। दू
षकताबीजसत्त्वे तस्योपाधित्वं दूषकताबीजं च न व्यभिचारादुन्नायकत्वमपि तु सत्प्रतिपक्षस्य तच्च तत्र नास्तीत्युक्तेन स उपाधिरित्याशंकते अथेति व्यभि
चारोन्नायकतया व्यभिचाराद्युन्नायकतया अव्याप्यतया अव्याप्यवादिना अव्याप्यत्वमव्याप्यत्वादि सत्प्रतिपक्षांतरवदिति व्याप्तिपक्षधर्मतारूपबलसत्त्वेनैकेना

पि बहूनां प्रतिरोधसंभवाद् बहुत्वस्याबलत्वात् यत्र प्रमाणतत्त्वबोधादौ बहुत्वमपि बलमुक्तं स्य सत्प्रतिपक्षतायां किं त्वेकतात्रांगभंगप्रसंगो बहुपुत क
रवमेकत्र लाघवमिति तर्कोपथापकतयेनोपाधेः सत्प्रतिपक्षमुद्रया तत्र दूषणत्वसंभव इति भावः। एवं सत्प्रतिपक्षोन्नायकतया दूषकत्वे बाधकस्या
निश्चयसाधारण्यादनिश्चयत्ववैयर्थ्यात् माऽस्तु सोप्युपाधिरित्यभिप्रायेणाशंकते तेनेति हेतुमतीति नन्वासंकीर्णवाधस्थले व्यभिचारः प्रतियोगिव्यधिकरणस्य
साध्याभावस्यैव प्रकृते बाधकत्वात् तदानभ्युपगमाद्व्याजते जलत्वादिने तितत्समशील विनाशुध्व साध्यव्यापकस्योपादरभावादित्यर्थः। तेन भास्वररूपस्य
न्यत्वादरूपवत्त्वावच्छिन्नसाध्यव्यापकगुरुत्वादेश्च सत्वेप्यदोषः। न च तद्व्यतिरेकोसाधारणः पक्षे साध्यस्यासिद्धो सपक्षाभावादसिद्धौ तु तत्रैव सापक्षे
र्तमानत्वादिति वाच्यं पक्षमात्रवृत्तिसाधारणइत्यभिप्रायात् जलादावुष्णत्वत्रिमदशायां तथात्वमित्यपरे ग्रीष्मोष्मणि तेजस्त्वाग्रहदशायाम प्रतीत
साध्यतदभावसहचारत्वरूपसाधारण्यमित्यन्ये असाधारणे हि साध्यसहचारग्रहप्रतिबंधेन व्याप्तिग्रहप्रतिबंधः व्यतिरेकव्याप्त्यादरस्तु साध्य
तदभावयोर्द्वयोरपि तत्र विशेषात् सत्प्रतिपक्षो दूषकताबीजं न वेत्याद्यः व्यतिरेकित्वात् न द्वितीयः सत्प्रतिपक्षे तदनवकाशात् तदः पक्षेतरापि सत्प्रति
पक्षोन्नायकतयोपाधिरेवेत्याह व्यतिरेकिणेत्यादिना। न त्वेवं प्राणकरीत्या व्यभिचाराद्युन्नायकत्वस्य प्रतिपक्षेनुद्भावनीयतापत्त्या च सत्प्रतिपक्षोन्ना
यकस्य दूषकतायामबीजत्वेनोपाधिदूषणमेव तस्माद्विशेषाभावात् अत आह तस्मादिति तदुक्तमुपाधेर्व्यभिचारशंकैवेति भवतु वा पक्षेतरोनोपा
धिरुपादीयतां च तद्वारणाय पिपक्षायाव्यावर्तकेत्यादिविशेषणं तथापि लक्षणमतिव्याप्तकमेव अणवः जन्या णवावासकतर्काः कार्यत्वादित्यादस
णुत्वादानणुव्यभिचाराद्युन्नायकमात्रेणोपाधित्वे व्यापकव्यभिचारित्वादावतिप्रसंग इत्यत आह तथैत्यादित्यथाने नरूपपक्षव्यभिचारेण व्यतिरेकपा

२६

वादूषकतायां व्यभिचारस्य सत्प्रतिपक्षस्य चोन्नायकतायामतिप्रसंजनभञ्जिकायां साध्यव्याप्यत्वस्य व्यर्थत्वात्साधनव्यापकधर्मस्योपाधित्वे साध्यान्वयव्यतिरे
कशालित्वरूपं साध्यप्रयोजकत्वं नियामकं अन्यथातिप्रसंगादित्याशंकेत अर्थेति। अभावत्वासतः भवतः सतः अर्थत्वादिति चे वंपक्षेतटत्वेति प्रसंगः तवा
पिपक्षेतरसाध्यवत्वादावतिप्रसंगात् विषयमव्यापकस्योपाधित्वे योगाभावं नियामकमाशंकेत अर्थेति उपसमीपवर्तिनि आदधाति स्वीयं धर्ममित्युपाधिः य
धर्मबोधकशब्दसमभिहारेणोपाधिपदं प्रयुज्यते तद्धर्मसंक्रामकत्वं तद्बोधयति यथा स्फटिके लौहित्ये जपाकुसुममुपाधिरित्यत्र लौहित्यसंक्रामकत्वं प्रयु
ज्यते तच्छास्त्रे व्याप्यत्वबोधकशब्दसमभिहारेण तत्र यथात्र साधने सावुपाधिरित्यतो व्याप्तिसंक्रामकत्वलाभः यत्र भावइति अस्तितावदिहहेतावुपाधि
नोहीपाधिरिति प्रतीतिव्यवहारश्च भावाल्लब्धं वेदं लक्षणवाक्यं तत्र यदि साधने उपाधिव्यभिचाराव्यभिचारौ तदोव्याप्यत्वव्याप्यत्वे वायादिवातेन संबंधेन
तदुत्पत्ती एवतदालंबनं उत्सय यथापि नक्षतिः। यदभावशब्देनापि तथैव वक्तुं मुशक्यत्वात् तदभावस्य व्यभिचारविरोधित्वं तत्सत्वे वश्यं व्यभिचारविरहः
तद्विरहिणि धर्मे वावश्यं व्यभिचारसत्वं तत्सत्वे वश्यं व्यभिचारविरहः उक्तव्यभिचारविरहिणि धर्मे चावश्यं तत्सत्वमिति वाइदृशस्य विरोधेन विषमव्यापका
भावस्य तत्सत्वेपि व्यापक एव व्यभिचारसत्वान्नापि विषमव्याप्याभावस्यासाध्या एवत दूरहेपि व्यभिचाराभावात् तादृशधर्मस्य चोक्तसंबंधेनोक्तस्य तत्संबंध
स्य वा यत्र वर्तेतत्तन्नायमुपाधिः स एव सोपाधिः अत एव तदभावलक्षणमनौपाधिकत्वं व्याप्तिरिति गीयते विरोधिकरक्तदलद्वयेनैकैकस्य व्याप्ति
शरीरघटकतादूषैतावन्मात्रादित्युक्त्योपादानमिति सर्वसुस्थं यदि च समव्यापकान्नि धर्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्पदे चन्निमात्परं बोध्यं
अत्र व्यभिचारस्य घटकघटकत्वे प्रमेयत्वपदं व्यतिरेकि धर्मोपलक्षणं। अथैतादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारिणि न तत्सत्वं तत्रातिव्याप्तिः तत्रात्य

ताभाद्वयकेत्यन्यदेतत् सामान्यलक्षणा सहस्रेणापि अविधत्वस्य ज्ञातुमशक्यत्वाच्च। वस्तुतस्तु सामान्यलक्षणां विनापायं कालः सुखादिप्रागभाववान् सुखोत्पत्तिकालीनध्वंसप्र
तियोगीवाकालात् एतादृशकालत्वादित्यनुमानादसिद्धमुखस्यतद सिद्धत्वस्य वज्ञानं सुलक्ष्ममेव निपुणतरउपपादयिष्यते चेदं शब्दमणिदीधितावितिकृतं पल्लवितेन॥
घटः सदित्यादिसंशयसमानाकारो हि निश्चयतद्विरोधेन वेति संशयः कोटितावच्छेदकघटत्वांशे निश्चकारकः न च प्रमेयत्वान् निति प्रत्ययः तथा अत एव जातिमानिति निश्च
येपि घटोन वेति संशयः घटत्वावानिति निश्चयस्तु घटेतरावृत्तित्वविशिष्टघटत्वमवगाहमानो घटान्यतोसंदेहो विरुणद्धि पुरुषादन्निवह कोटिराद्धिनिश्चयइव पुरुषत्व
संशयं स्वसामग्री विरहादिति घटइति निश्चयं प्रति घटत्वांशे निर्विकल्पकं ज्ञानं कारणं जातित्वादिना घटत्वाज्ञानेपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारकज्ञा
नजनकत्वनियमाद्विशिष्टज्ञानसामग्रीसत्वात् प्रसंगादुपाधिं निरूपयितुमाह उपाधीति। सोपाधौ साध्यत्वसाधनत्वे नसंभवइति भिमतेतियायाद्व्यापकत्वे सतियदव्यापकः
सतत्रोपाधिरिति निर्गलितार्थः व्यापकत्वाव्यापकत्वे एकरूपेण विवक्षिते ननूपाधेः साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं साध्ययावदुपाधिव्यापकव्यापक
त्वरूपानौपाधिकत्वज्ञानादेवग्राह्यावुपाधिव्यापकयावदर्थान्तर्गतस्य वोपाधेः साध्यव्यापकत्वग्रहः साध्यनिष्ठव्याप्तिग्रहादित्यन्योन्याश्रयइत्यत आह। अनौपा
धिकत्वेति व्यापकत्वे व्याप्तिनिरूपकत्वेसाध्यनौपाधिकत्वग्रहाग्रहीतायामततद्विशिष्टव्याप्तिज्ञानमप्यनौपाधिकत्वांतरग्रहादित्यनवस्थेत्यत आह अनौपाधिकत्वे
तिअन्यान्याश्रयपदमनवस्थापरमिति तु संप्रदायः अव्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह प्रतियोगित्वेति। तदधिकरणानधिकरणत्वं तदधिकरणानधिकर
णत्वविरोधिप्रतियोगित्वं यत्प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदित्यर्थः गृहीतत्वं प्रतियोगिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितार्थः। साधनेति। अनया
रसंकरोमप्रदर्शयिष्यते पक्षइतिपक्षइतरोयस्मादिति बहुव्रीहिः भावप्रधानस्त्वनिर्देशः पक्षभिन्नत्वस्यतिव्यावर्तयीयतीतियुक्तत्वाद्वृत्तिधर्मवैनन्वत्यपिकश्चित्तदात्म्येन

उपाधिरुद्भाव्यतितद्धेत्विति प्राकृतानुमानविरोधिसिद्धसाध्यव्यभिचारसाधकत्वादिति भावः। अथ वक्ष्यमाणरीत्या अवच्छिन्नसाध्यव्यापकेनाप्युपाधिना हेतौ साध्यव्यभिचारः
साधनीय इत्यत आह किं चेति। पक्षधर्मावच्छिन्नेत्यादिकमुपाधिमात्रव्यभिचारोपलक्षकेनोपाधिः न प्राधान्येनोपाधिः व्याप्त्यादिविरहेणाहेतुत्वात् पर्यवसितेति अक्ल
क्षणनियामकं दूषकताबीजं सत्यतिपक्षोन्नायकत्वं व्यभिचारोन्नायकत्वस्य तत्त्वे साध्यवत्पक्षावृत्तेर्व्यभिचारोन्नायकत्वस्य तत्त्वे साध्यवत्पक्षावृत्तेर्व्यभिचारोन्नायक
अव्याप्तेः वक्ष्यमाणकृतकत्वोपाधेर्दूषकतापत्तेश्च न हि तद्व्यभिचारेण हेतौ शुद्धसाध्यव्यभिचारः शक्योन्नयनो बाधानवतारदशायां तादृशव्यभिचाराप्रसिद्धेः। न
त्वपर्यवसितसाध्यव्यभिचारः साध्यव्यापकताबाधविरोधीतिनन्वेवमपि कथं तत्र सद्धेतावुपाधिसंभवो मीमांसकमते न तदभिधानात् शब्दो यथार्थप्रधानत्वाद्
पक्षतावच्छेदकादेरुपाधितावारणाय पक्षावृत्तित्वे सतीति विशेषणीयं। यद्धेनेति एतद्बत्तत्र कृतत्वासाधनदशायां ज्ञेयं अनित्यत्वसाधनोपयोगितायां तुकृतक
त्वसादनेद्वयोरपि संदिग्धत्वेनैकतरव्यतिरेकस्यान्यतरव्यतिरेकसाधकत्वात् एवं हीत्यादि असमवेतत्वेन द्रव्यासमवेतत्वेन वा अर्थान्तरवारणाय सावयवत्वं इति साध्ये द्र
व्यपदं नित्यद्रव्यवृत्तितायाः स्फुटतरसिध्यर्थं द्रव्यसमवेते नित्यद्रव्यसमवेतत्वस्य नित्यद्रव्यसमवेतत्वमादाय पर्यवसानाद्बाध्येतो न जन्यपदं परमाणुनित्यत्वसिद्धिदशा
यां आकाशादेर्व्याप्तिग्रहार्थं विशिष्टाभावस्य वातिरिक्तत्वेन वैयर्थ्यं नित्यमहत्त्वव्यावृत्तानित्ययावन्महत्त्ववृत्तिजातिपरिचयायेत्यादितुना तादृशजातौ प्रमाणाभा
वात् वैभवापेक्षिकापकर्षव्यवहारस्याननुगतजातिभिरेव संभवात् तुल्यन्यायतया त्रसरेणुत्वापेक्षिकोत्कर्षेणैकजात्यस्संकरप्रसंगाच्चेति स्पष्टेति साध्योपाध्योर्व्या
प्यदार्घ्यप्रदर्शनाय द्रव्यपदं गमकतावृत्तेन विना पर्यवसितसाध्यसमव्याप्यत्वेवोपाधिरितिमतेनेदमिति कश्चित्तन्नु भवतां शुद्धसाध्यव्यापकस्पर्शवदसमवेतत्वकथं
नोपाधिः अवस्थितिभियाकस्यचिन्निरवयवस्य स्पर्शवतः सिद्धौ तत्समवेतद्रव्ये साध्याव्यापकत्वादिति तन्न तुल्यममापीत्यत आह केचेति सोपाधौ सोपाधितया निश्चितेननुल्य १८

त्वं लासयोग्यतापक्षे यादृशसाध्यं शोधूममर्हतीति यद्व्यापकत्वे सति पक्षावृत्तित्वं पक्षे साध्यसिद्धिविरोधिव्यापकताशालित्वमिति यावत् स्वव्यतिरेकेण पक्षे
साध्यसिद्धिविरोध्युन्नायकत्वमितितु निर्गलितार्थः। भवति च शब्दे बृधर्मातिरिक्तधर्मरहिते शब्दे अनित्यत्वाभावसिद्धिर्यथोक्तसाध्यसिद्धिविरोधिनी
तथा साधनादिमति साधनाद्यवच्छिन्नसाध्याभावसिद्धिरपि वस्तुतस्तु पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वं सिध्यति चावि
शेषणवत्तिविशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेकः तादृशश्च साधनव्यापकः सुग्राह्योव्यभिचारोन्नायक इव पक्षवृत्तिरिति तेषां अपरेषां सत्प्रति
पक्षोन्नयनक्षमस्य साधनव्यापकस्य वास्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसंग्रहेन दोषाय परेषां साधनभेदादिवास्माकमपि पक्षभेदादुपाधि
भेद इति चेदत्र वक्ष्यते ग्रन्थकृते वलक्षतावच्छेदकमाह यद्व्यभिचारत्वेनेत्यादि उन्नीयत इति शेषः। उन्नायकत्वं तद्योग्यता सा च व्याप्तिपक्षधर्मता। तथा च तद्व्य
भिचाराय धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिदधिकरणवृत्तित्वं साध्यव्यभिचारव्याप्यं साधनवृत्तित्वेन च तद्धर्मावच्छिन्नं तत्रोपाधिरित्यर्थः। तेनोर्ध्वदेशाव
नाभाववद्वृत्तित्वेन वह्नौ धूमव्यभिचारसाधनेप्यार्द्रेन्धनद्रव्यात्वादिनान्त्रोपाधिः। तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वन्ह्यवृत्तित्वाच्छुद्धसाध्यव्यापके
दभाववन्मात्रवृत्तित्वं साध्यव्यभिचारव्याप्यं अवच्छिन्नसाध्यव्यापके तु अवच्छेदकाधिकरणीभूततदभावाधिकरणवृत्तित्वमिति तु यत्रापि संगतिः द्रव्यत्वे
वनरूपत्वे साध्ये सत्ताद्व्यत्वजलत्वमात्रविशेषिकाया धीस्तद्विशेष्ये जलसमवेतानित्यत्वे वासति पृथिवीत्ववद्वृत्तित्वादीति प्रकारेण व्यभिचारोन्नायकतामात्रेण प्रकृतोपा
धिता निर्वाहोपि तु कथकानां तात्रिकाणां च न तथाविधव्यवहारविषयत्वेन तदवच्छेदकं च यथोक्तरूपं व्याप्यत्वासिद्ध्युन्नायकत्वादिकं संभवदपि न तथा गौरवत् न च व्यभिचारोन्ना
यकतामात्रेण प्र। अत एव द्जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्नायकस्यादिद्रव्यत्वादेरसंग्रहोन्न दोषाय अपि च स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथा स्के

लाघवात्तन्नोक्तोपाधावप्यस्तीतिविवेकः एवं तद्धि साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वमेव तथा स्कन्धसहार्थे तृतीयाश्रवणं नास्यपि स एवार्थः तद्रूपमात्रज्ञा
नेनैषां नोपाधिव्यवहार इति चेन्न तुल्यत्वेनदुक्तेपि अत एव शुद्धसाध्यव्यापकस्थले साध्यव्यापकतावच्छेदकं नियममतताद्दृशं धर्ममनुसरंतीति ते यद्वदंतीति साध्यव्यभि
चारनियमोऽभावत्युपाधिव्यभिचारस्य वस्तुतस्तु यदभावेन तद्वदन्यत्वेन वा साधनवतिसाध्याभावउन्नीयते सउपाधिः लाघवात् अतएव जलत्वं तत्र स्वत्वयोः
दुभयत्वेन रूपेणन क्वचिदप्युपाधित्वं यतव्यभिचारित्वेनत्यस्यापि स एवार्थः तथाहि । यद्व्यभिचारेण हेतुमद्वृत्तिविधया साधनस्य पक्षतावच्छेदकीभूततस्य सा ते४
ध्याभावरूपसाध्यवत्पक्षवृत्तित्वं सिध्यतीति । अत्र वसाध्यसमानाधिकरणत्वेनावच्छिन्नो धर्मः साध्यासमानाधिकरणार्द्रेन्धनादिव्यक्तेरार्द्रेन्धनत्वादिना
पाधित्वे पुनरवच्छेदकधर्म एव साध्यसमानाधिकरणवृत्तित्वेन विशेषणीयः तेन त्वाभावाधिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचारव्यापस्य
वह्निवृत्तित्वेपि जलह्रदत्वेनातिप्रसंगः नवाद्रव्यत्वेन तेजस्त्वसाधने शीतस्पर्शाजलत्वाद्यात्मकस्वभावेन तद्वृत्तित्वेन वाद्रव्ये द्रव्यत्वेवासाध्याभा
वस्य व्यभिचारस्य वाभावसाधकस्पर्शाभावजात्यभावादौ द्रव्यत्वादिना तु कंबुग्रीवादिमत्वादौ साध्ये व्यभिचारेणस्वभावेन वा हेतौ तद्वृत्तित्वाव्यभिचारस्य साध्या
भावस्य वा साधकं घटत्वादि व्यभिचारित्वमुपाधिरेव घटत्वादेस्तदभावस्य वागमकत्वेपि धूमप्रागभाववद्वैयर्थ्यं । न वाभावस्यानुपाधितापत्तिः प्रति
योगिनस्तद्वृत्तित्वस्यैव वाहेतुत्वादिति वाच्यं तस्याप्रवेशेपि वस्तुतोयस्तदभावस्तस्य तद्वृत्तित्वस्य हेतुत्वानपायात् तदभावाभाववृत्तित्वेनोपस्थि
तावपि तद्वृत्तित्वेनानुपस्थितेर्व्यभिचारसाधनेन वैयर्थ्यमित्यपि वदंति लक्षणमाह पर्यवसितेत्यादि पर्यवसितपदार्थमाह यद्धर्मेति । यद्धर्मवतीत्यर्थः
नन्वेवसद्धेतौ सपक्षैकदेशवृत्तिधर्मेतिप्रसंगः । अथ यद्धर्मावच्छेदेन साधनवतिसाध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वं साध्यसाधनसंबंधव्याप

४

स्यात्यंतमसत्वेनाभावानिरूपणे तु तत्र त्यसक्षेताव्याप्तिरत आह व्यभिचारेति । यस्य यद्व्यभिचारस्य यदव्याप्यत्वस्य वाभावसाध्यव्यापकव्यभिचारिविरोधी: स साधनाव्यापक उप
धिरित्यपिवदंति यद्व्यभिचारित्वभाव: साधनसाध्यव्यभिचाराभावापादक: स साध्यव्यापकोपाधिरित्यपि कश्चित्तन्न यद्व्यतिरेक इति यद्व्यतिरेके नुमितिप्रयोजकं रूपं व्याप्याद्यन्यत
मं भवत्येव यथासिद्धिव्यतिरेके सिद्धिरित्यर्थः । किंतु ह्रदत्वादेरिति विपक्षमात्रगामित्वपक्षविपक्षगामित्वलक्षणविरोधव्यभिचारयोरेकैकविरहेपि व्याप्त्यैरनियमादित्यर्थः य
त्रपक्षेहेतुमति न साध्यं हेतुश्च पक्षावृत्तिः तत्रैकः पक्षावृत्तिहेतुसमानाधिकरणापरश्च पक्षनिष्ठसाध्यवति हेतुसमानाधिकरणः हेतुसमानाधिकरण एव वा उपाधिस्तत्र साधन
पक्षधर्मावच्छिन्नसाध्यव्यापकयोस्संकरो बोध्य यथा घट: प्रत्यक्षोनित्यद्रव्यत्वाद्धि सुखादावुत्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापकं उद्भूतरूपवत्वं प्रत्यक्षस्पर्शाश्रयत्वं वासाधनाव
च्छिन्नसाध्यव्यापकमत्वं मिथोसंकीर्णमुपाधिः अश्रावणत्वेति घटोमेयो द्रव्यत्वादित्यादौ गंधवत्वाद्यवच्छिन्नसाध्यव्यापकं पृथिवीत्वादावतिव्याप्तिर्द्रष्टव्या नवा अनेनरूपेण
ज्ञातस्य दूषकत्वमित्याह । आर्द्रेन्धनेति । पक्षधर्मेति विरुद्धस्थलीयोपाध्यव्याप्तिरपि द्रष्टव्या साधनावच्छिन्नेति स्वावच्छिन्नेत्यर्थात् साधनवतीति विशेषणाद्दान व्यभिचारेन
तु शुद्धसाध्यव्यापकस्थलएवाभिसिध्दिशेका निरासायावच्छेदकांशो निवेशनीयो खंडाभावस्य घटकतया वा न वैयर्थ्यं येन रूपेणोपाधिता विशेषणवति तद्रूपावच्छिन्नव्यभिचा
रस्यैव वा हेतुत्वे शुद्धसाध्यव्यापकस्थले तु साध्यव्यापकव्यभिचारो व्यापकतावच्छेदकार्द्रेन्धनत्वाद्यवच्छिन्नव्यभिचारो वा हेतुरुपन्यसनीय: प्रायशस्तद्धर्मवति तद्धर्मविशिष्ट
साध्यव्यापकव्यभिचारित्वस्य हेतुत्वेपिन वैयर्थ्यं अखंडाभावस्यातिरिक्तत्वात् वस्तुतस्तु उपाधिना साधकत्वा साधनेपि न क्षतिः उद्भावितया वद्दोषवत्त्वात् साधनयिभितिनि
यमाभावाद् उन्नीतव्यभिचारेण तत्साधनसंभवात् संदिग्धोपाधिसमशील: संदिग्धव्यभिचार इत्यत आह किंचेति केवलेति । तथा न केवलस्यैव साध्यस्य व्यभिचारो व्यतिरेको वा
जिज्ञासितोविरोधित्वात्तत्तद्विशिष्टस्याविरोधित्वादिति भावः । उद्भाव्येति विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयस्तत्रविशिष्टव्यभिचारे सिद्धातु भावितायां तत्सिद्धये

रणवृत्तिधर्मवत्त्वमुपाधित्वं पर्यवसितसाध्यव्यापकत्वाभिधानं व्यापकव्यभिचारेण व्यापकव्यभिचारावश्यंभावप्रदर्शनार्थं तत्साध्यकतत्साधनकसक
लोपाधिसाधारणं चेदं साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदनरूपान्नातिरिक्तं वृत्ति साध्यसमानाधिकरणयत्किंचिद्धर्मसमानाधिकरणात्यंताभावप्र
तियोगितानवच्छेदकधर्मवत्त्वमुपाधित्वं अवच्छिन्नसाध्यव्यापकोपाधौ चांततः साध्योपाधिशून्यासाधनवतीयाव्यक्तिस्तद्वृत्तित्वमेव स्यादृज्ञरूपमित्य
पिवदंति रूपादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापत्तेस्तु स्वनिष्ठसाध्यानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्य
व्यापकत्वे सति साधनाव्यापकत्वं अत्र च सूर्यदलप्रविष्टायाः साधनव्यक्तितदव्यापकत्वं बोध्यं तेन रूपादिना गुरुत्वादौ साध्ये पृथिवीत्वाभाव
दौ नातिप्रसंगः विवेचयिष्यते चेदमुपरिष्टात्साध्यासमानाधिकरणधर्मस्य साध्यव्यापकाभावस्य वा समानाधिकरणयत्साधने तद्वृत्ति प्रतियो
गितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यंताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणयत्किंचिद्धर्मवृत्तित्वाभावप्रतियोगितान
वच्छेदकधर्मवत्त्वं वा एवं चावगते साधनवति साधने वा साध्यासमानाधिकरणधर्मादिना तत्समानाधिकरण्येन वा साध्याभावो व्यभिचारो वा
क्यत्वेवानुमितिर्ध्येयं उपाधिज्ञानस्य साधननिष्ठव्यभिचारादिविषयत्वं सहिष्णुतायां तु साध्यव्यभिचारित्वेन साध्याव्याप्यत्वेन वा साध
नेविशेषणीयं ॥ भिन्नास्त. । यद्व्यभिचारित्वेनेत्याद्येवल्लक्षणपर्यवसिते त्यादिकं तु व्यभिचारोन्नायकताप्रयोजकरूपप्रदर्शनं तत्र पूर्वं प्रतीके
व्याप्ते द्वितीयं च पक्षधर्मतायाः प्रदर्शनार्थं एवं च अयमेतत्साधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगी ह्यर्थकेयमत्र हेतावुपा
धिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्वमित्याकांक्षायां व्यभिचारोन्ना[illegible]पि साधु संगच्छत इत्याकूतः ॥ न व्यास्त ॥ संयोगवदन्यत्वेन द्रव्यत्व

१९

भावस्येव संयोगाभावाभावेन संयोगेन द्रव्यत्वाभावाभावस्य साधनसंभवात् परिशेषस्य दुष्करत्वात् तस्याप्युपाधिलक्षणं तु साधनवति साध्या
भावोन्नायकव्यतिरेकप्रतियोगितावच्छेदकरूपवत्त्वं प्रतियोगित्वं च तदभाववत्त्वं व्यत्यादितत्त्वप्रतियोगितावच्छेदकस्यैवान्योन्याभावाभावव
शेषं पूर्ववदिति वदंति विशेषणाव्यभिचारित्वेन वा मित्वेनेत्यादिसामान्यतो दृष्टमेव एकविशेषबाधे भावयति विशेषांतरप्राकारिकानुमि
तिनवातिरिच्यते विशिष्टाभावो विशेषणविशेषाभावो व्याप्यमिति मतेनेदं स्वमते नाह यद्वेति । प्रत्यक्षस्पर्शाश्रयत्वमित्यादि प्रत्यक्षसंख्या
परिमाणवत्त्वाद्युपाध्यभिप्रायेण पया[illegible]तमेव साधु अनेकत्वादेरपि प्रत्यक्षत्वांगीकारात् उद्भूतरूपादिपरत्वेन साध्ये हेतौ च प्रत्यक्ष
पदं बहिरिंद्रियप्रत्यक्षपरं द्रव्यपदं वा बहिर्द्रव्यपरं महत्त्वपदं च जन्यमहत्त्वपरं व्यापकव्यभिचारित्वे च व्यापकरूपावच्छिन्नाभाववृत्तित्वं
न द्रव्यपदवैयर्थ्यं विशिष्टाभावस्यातिरिक्तत्वात् द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपादिव्यभिचार एव हेतुः । व्यापकत्वोपन्यासस्तु तर्क
प्रदर्शनायेति स्कुतत्वं द्रव्यत्वाव्यभिचाराद् द्रव्यत्वाभाववदवृत्तित्वं मित्रातनयत्वमिति अनुमानमिदं उपाधेः प्रमाणांतरेण साधनव्या
पकताभिर्णयदशायां ननु तद्व्यभिचारित्वे तदत्यंताभाववद्वृत्तित्वात् तथा च साधनविकलोयं [illegible]साध्यवान्दृष्टांत इत्यत आह व्यभिचारा
श्रितानन्वेवं शेषवैयर्थ्यं धूमप्रागभाववधर्मभावादवैयर्थ्यमिति चेत् तथापि मित्रातनयत्वव्यापकत्वविशेषितं वृत्तित्वमेव गमकमि
तिनेवनयात्किंच तदधिकरणाभिन्नात्यंताभावप्रतियोगित्वस्य फलतः सामानाधिकरण्यपर्यवसितत्वस्योक्तत्वात् तथा चायमर्थः मित्रातनय

त्वाधिकरणयद्वृत्तिनिष्ठात्यंताभावप्रतियोगित्वं तत्त्वं शाकपाकजन्यत्वव्यभिचाराव मित्राक्षिनये ह्याकपाकजत्वव्यभिचारादितियावत् तेन श्याम
त्वादौ न व्यभिचारः अव्यभिचारस्थेत्यादि तथा च बहुव्रीहिः। यद्धर्माव्यभिचारित्वे सति यद्धर्मावच्छिन्नयत्साध्यव्यापकव्यभिचारित तत्साध्यव्य
भिचारीति सामान्यव्याप्ताभावघटत्वं दृष्टांत इत्यपाहुः। भेयत्वादावपि विशेषणवत साध्यव्यापकोपाधिव्यभिचारेणस्तु धूमसाध्यव्यभिचारः सा
धनीयः एवं विशिष्टसाध्यव्यापकस्यापि साक्षाद्धूमसाध्यव्यभिचारोन्नायकतया उपाधित्वसमर्थ्य साक्षात्परंपरासाधारणतदुन्नायकतामा
त्रेण तथात्वं व्यवस्थापयति तद्दृत्यादि अत्र पूर्वद्वि रुधूवारणाय साध्यसमानाधिकरणेतिवाच्यं व्यभिचारोन्नायकत्वं च यत्र कुत्रचित् एवं च
पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नायकस्य स्वरूपत्वादेर्वारणाय साधनव्यभिचारीति बहुव्रीहिः। नचैवमपि गुरुत्वा
दिसाध्यकरसवत्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभिचारिजलभिन्ने पृथिवीत्वादिव्यभिचारित्वादिति व्यभिचारोन्नायके पृथिवीत्वादाव
तिप्रसंगः साधननिष्ठंय द्व्यभिचारित्वं साध्यव्यभिचारोन्नायकं न त्वस्योक्तत्वात् उक्तिवैचि। व्याख्यपूर्वस्माद्भेदः केचित्तु व्यभिचारोन्नायकत्व
भिहत व्यापकोटिप्रविष्टाभावमात्रेण इत्यं च जलत्वे नूकात्वे साध्ये जलत्वं कारकात व्यभिचारिस्नेहव्यापकत्वात् घटेन वा घटत्वे साध्ये घटो घटत्व
व्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य न वारणाय साधनव्यभिचारीति अयं घटः सत्वादित्यादौ सत्वं घटत्व
व्यभिचारिश्याद्यादिवत्ति त्वादिति व्यभिचारोन्नायकस्य श्यामादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यं एवं च रूपेण गुरुत्वादौ साध्ये रूप
गुरुत्वादिव्यभिचारिजलभिन्नपृथिवीत्वाभाववद्वृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वादिव्यभिचारतेजसादिरूपनिष्ठव्यभिचाराप्र

२०

कमितियावद्विरुद्धमात्रेणोपाधिविरहेपि न क्षतिः लक्ष्यतावच्छेदके च साध्यसामानाधिकरण्येन साधनं तादृशवृत्तित्वेन वा साधनावच्छेदके विशेषणीयं
साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वं वा विवक्षितं विरुद्धेपि साधनव्यापकेनातत्तोन्यतरत्वादिनावच्छिन्नस्य साध्यस्य व्यापकत्वमस्त्येवोपा
धीनो प्रमेयत्वादिना च वाय्वादीनां प्रत्यक्षत्वे साध्ये उद्भूतरूपत्वादिकं नोपाधिः लक्ष्यतावच्छेदकवाक्यस्य प्रयोजकत्ववादित्वनीयाबलाद्यद्व्यभिचारस्थ
लेसाधनस्य साध्यभिचारनियम इत्यर्थपर्यवसानात् मैवं ज्ञानकत्वेन वन्हेः कार्यानुकूलत्वाद्याघात्मकत्वाकि साधनबहिरिंद्रियाप्रत्यक्षत्वस्योपाधेः ग्रंथकृतो
ह्यावयिष्यमाणत्वात् तस्य च गुरुत्वात्मकसाध्यस्य साधनस्य चाधिकरणे घटादाववृत्तावुक्तरूपाभावात् एवं विधवलग्रंथविरोधात् दूषकताबीजस्य
तत्रापि सद्भावाच्च अत्राहुः यद्धर्मावच्छिन्नसाध्यव्यापकत्वं अवच्छेदकत्वं च सामानाधिकरण्येन न वत घटोत्पत्तिकालीनत्वासामानाधिकरण्येन विशिष्ट
पवति तद्घटे वर्तमानमपि तद्घटान्यत्वं तद्व्यापकं येन पृथिवीत्वे येन रूपे साध्ये तद्घटोत्पत्तिकालावच्छिन्नरूपव्यापकतयोपाधिः स्यात् स्वानधि
करणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा यद्यपि धूमसाध्यव्यापकस्थले ऽवच्छिन्नसाध्यत्वेन न व्याप्यता तथापि तद्धर्माधि
करणीभूतसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वादिरूपं तद्व्यापकत्वमक्षतमेव गुणत्वादिना प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्वे द्रव्य
कजन्यत्वाद्यवच्छिन्नसाध्यव्यापकं भवत्येवोपाधिः एवं च यत्रैव स्वानधिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यं तद्विषयमात्रवृत्ति
र्योधर्मः तद्वति तद्व्यभिचारेण साधने साध्यव्यभिचारः साधनवति वा तद्धर्मवत्वे सति तदभावत्वेन साध्याभावः साधनीयः साध्यसमानाधिकरण्यस्य
साध्यव्यापकाभावस्य वाधिकरणं यत्साधनवन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यंताभावप्रतियोगिकावच्छेदकसाध्यसमानाधिक

धोन्नीतवद्गवत्येवनिश्चितोबाधिः नचस्वव्याघातकत्वान्नायमुपाधिःतस्मिन सर्वानुमानसाधारण्यं अनुकूलकतादिनिश्चितव्याप्तिकेहेतौतदाभावात् नापितद्य
स्मिचारेण व्यभिचारानुमानेपिपक्षेतरस्योपाधिसंभवः अनुकूलतर्कादिनातस्यसाध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यंभावेन तदया
गात् एतएवपक्षेतरस्योपाधित्वेसर्वत्रैवतादृशोपाधिसंभवेनानुमानमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्यव्याघातइतिपरास्तेकथकसंप्रद
यानुरोधात् बाधानुन्नीतः पक्षेतरोनोपाधित्वेनकथायमुद्भाव्यतइतिवदंतिपक्षमात्रेऽपियद्यपि पर्वतावयवरूपादेरपिव्यावर्तकं ततस्तथापितस्यव्यावृत्ति
नोपाधितायामुपयुज्यतेअपितुपक्षस्यैवेतितन्मात्रव्यावर्तकत्वमुक्तं इदं चानुपाधितायांनबीजं परिभाषामात्रत्वात् किंत्वनुकूलतर्काभावेन तादृशसाध्य
व्यापकत्वनिश्चययइतिद्रष्टव्यं अतएवव्यापकताग्राहकप्रमाणसद्भावादेवआर्द्रेंधनेतिअथात्रचतंत्रान्वयव्यतिरेकाभ्यामार्द्रेंधनत्वादिनैवकारणत्वेनपुनरार्द्रें
धनप्रभववन्हित्वेनइतिचेत् किंचातः नहिकारणतावच्छेदकमेवव्यापकतावच्छेदकं तादृशाभावप्रतियोगितानवच्छेदकस्यैवतत्वात् तदवच्छिन्नप्रतियो
गिताकाभावस्यचातिरिक्ततयातद्वद्वृत्तित्वेनसाध्यव्यभिचारसाधनेवैयर्थ्याभावात् सत्यप्यार्द्रेंधनेतत्संयुक्तेचवन्हौदाहप्रतिबंधकसत्वेधू
मानुत्पादात् कॢप्तकारणभावस्यवन्हेर्विशेषरूपेणकारणत्वकल्पनयाउपपत्तावकॢप्ततत्कारणभावानांदाहप्रतिबंधकाभावानांतत्कारणत्वक
ल्पनानौचित्यात् एकस्यामार्द्रेंधनोद्भवोप्रतिरुद्धायांतत्रैवव्यक्त्यंतराधूमोत्पादात्तत्तदिंधनजन्यधूमप्रतितत्तदभावानांकारणत्वस्यवाच्य
त्वेतिगौरवाच्चमहदितिवार्द्रेंधनतत्प्रभवेचाणीयसिवन्हौमहतिवार्द्रेंधनेतत्प्रभवेवावन्ह्यंतरेविद्यमानेप्यार्द्रेंधनप्रभवमहावन्हेरनुत्पाददशा
यांप्रकृष्टधूमानुत्पादार्द्रेंधनप्रभववन्हित्वेनकारणत्वमित्यपिवदंतितदुत्कर्षेणेतिआर्द्रेंधनप्रभववन्हिसामान्यंविनाधूमसामान्यस्यप्रकृष्टता।

कृशावन्हिंविनापकृष्टधूमस्यानुत्पादनियमादार्द्रेंधनप्रभववन्हेरेवधूमोपधायकत्वंतत्रार्द्रेंधनप्रभववन्हित्वकारणतावच्छेदकमथवेशसंपन्नानांतरीयकमे
वचास्मत्पक्षेनकश्चिद्विशेषइतिभावः। अन्यथेतितादृशान्वयव्यतिरेकाभ्यांउद्भूतरूपस्यतद्वतोद्रव्यस्यैवचाकारणत्वंउभयथापिव्यापकत्वंउद्भूतरूपत्वे
नतत्वंपुनरुपदर्शितमेवघटोत्पन्नक्षणेइतिध्वंसप्रागभावानधिकरणकालस्यप्रतियोग्यधिकरणत्वनियमात् नचप्रागभावस्यप्रतियोगीध्वंसमितिध्वं
सोपिप्रतियोगीनोध्वंसइतिवाच्यंअप्रामाणिकध्वंसतत्कारणधाराकल्पनाअतोध्वंसानंतत्वकल्पनायाएवोचितत्वादितिकार्यकारणयोरेवकार्यकारणा
भावग्रहकप्रमाणक्रोडीकृतयोरेवपक्षेतरस्येत्यादिननुसंदिग्धोपाध्यंतरवत्पक्षेतरोपिव्यभिचारशंकामादधानःकेनवारणीयःस्वव्याघातकत्वंचनिराकृत
मेवअथात्रकश्चिदुपाधिर्भविष्यतीतिशंकाशंकापिशावीताद्यथानव्यभिचारशंकाधायिका तथापक्षेतरोपाधित्वशंकापितदाहितापिवाव्यभिचार
शंकापक्षेव्यभिचारशंकवनप्रतिबंधिकाअन्यथानिरुपाधिसहचारसंगप्रसंगमात्रबलप्रवृत्तानामनुमानाविलयप्रसंगादितिचेत्न संदिग्धोपाध्येतर
साधारणव्यभिचारशंकाधानप्रयोजकरूपवतापक्षेतरेणतदाधानप्रयोजकस्तेः प्रतिबंधकत्वासंभवात्व्यभिचारज्ञानत्वेनप्रतिबंधकतायांकारणविशेषधी
जन्यत्वादिकंनविवादतेगौरवात्मानाभावाच्चकथमन्यथाकरवन्हिसंयोगः सर्वःसंयोगोवाप्रत्यक्षसंयोगधर्मातिरिक्तसमवायित्वादितोनचकयादिसिद्धिःनि
रुपाधित्वेप्यप्रयोजकत्वादितिचेन्ननिरुपाधित्वस्यैवप्रयोजकत्वात्तत्पात्वेपिवाप्रयोजकत्वेनिरुपाधित्वाभिमतानामितरेषामीतितुल्यत्वात् अत्रचकृत्नप
क्षतिरिक्तेव्यभिचारशंकाकस्याश्चाकम्यामहः यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणन्निरुपाधित्वमितियतस्तत्रांततः पक्षसपक्षैकदेशावृत्तिधर्माव
च्छिन्नसाध्यव्यापकानोसपक्षैकदेशवृत्तिधर्माणामुपाधित्वंसंभवतिइत्थंचयथानातिप्रसंगः तथातत्रतत्रवक्ष्यामइतिसत्यंकथकसंप्रदायानु

रोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवं परोयं ग्रंथ इत्याहुः सोपाधावेकत्रेत्यादि उपलक्षणमेतत् व्यभिचारिण्युपाधेरवश्यंभाव
मात्रे तात्पर्यं उपजीव्योपजीवकभावो हि न कार्यकारणभावो संभवात् व्याप्यव्यापकभावस्तु किंचित्करः विशेषस्तु ज्ञायमानदूषणतया एकमवि
ज्ञायाप्यन्यतरज्ञानाज्ञानज्ञाप्यज्ञापकभावः न वा अनुकूलतर्कविरहादेव व्याप्तेरग्रहे कृतमुपाधिज्ञानेन विनाप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्ति
ग्रहसंभवादिति भावः। यद्वाव्यत्येति। अत्र पक्षइति पूरणात् पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः सत्प्रतिपक्षोन्ना
यकत्वं वात्र दूषकताबीजं अत्र चाप्रयोजकत्वात् साधनाव्यापकत्वेनोपात्तं साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति यद्वा
साधनस्येत्यनेन तरमधिकरणइति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः। तथा च यद्वाभिदेतिसिद्धे वारित्वेनेत्या
दिरूपवर्णितार्थनिष्कर्ष एवायं शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधीनां पक्षे क्वचित् साधनवति वा साध्याभावस्यैकस्युन्नयनप्र
कारमाह सर्वेत्यादि साधनवत्त्वेन ज्ञायमाने पक्षसाध्यसाधनसंबंधाभावः सिध्यन् पक्षधर्मता बलात् साध्याभावमादाय पर्यवस्यति ननु शु
द्धसाध्याभावोन्नायकस्यार्द्रेंधनवत्त्वादेः कथं साध्यसाधनसंबंधाभावोन्नायकत्वमत आह आर्द्रेंधनेति। अत एवेति साध्याभावसत्त्वे साध्य
साधनसंबंधाभावाभावत्वात्तदुन्नायकत्वमक्षतमिति भावः। द्रव्यत्वइति द्रव्यत्वस्य हेतुत्वाभिप्रायेण अयं च प्रापन्नाः संभवतीत्यभिहितावस्था
तः प्रकारसंदेहं निरस्यति अथ वेति शुद्धसाध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्नतद्व्यापकस्थले तदवच्छेदकावच्छिन्नसाध्याभावोवच्छे
दकवत्त्वविशेषितेन न चोपाधिविरहेण शुद्धसाध्याभावः साधनीयः अत एव गगनादौ सत्त्ववत्त्वेन प्रमेयत्वे न प्रत्यक्षत्वे साध्ये बहिर्द्रव्यत्वावच्छि

न्नियोगिनः पृथिवीत्वाभावस्य वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यं यथाकथंचित्त्वव्यभिचारेण व्यभिचारोन्नायकमात्र
स्य तुल्लक्षणत्वे तु यत्साधनव्यक्त्यव्यापकत्वं तद्व्यक्तौ व्यभिचारोन्नायकत्वं वा व्यभिचारमित्याहुः। नन्वस्तु पारिभाषिकमुपाधित्वं यथापि साक्षाद्व्यभिचारानुन्ना
यकत्वादोषत्वाभावेन तदुद्भावनेर्थान्तरं स्यादेवेत्यत आह किंचेति। आभासान्तरस्य तदानीं ज्ञायमानस्य तथा च तस्यावश्यायास्तु यदोषत्वाभावत्वेत तदुद्भा
वेनार्थान्तरमिति भावः। अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधनस्य वा तत्साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकांक्षितत्वात् तमनुद्भाव्य साक्षा
त्साधकस्य शुद्धसाध्यव्यापकोपाधेरुद्भावनस्याप्राप्तकालत्वं कैवकथापरंपरात् साधकस्यावच्छिन्नसाध्यव्यापकस्यान्यथा तत्साधकपरंपराया अ
पि प्रथममुपन्यासे तथात्वं न स्यात् न च निग्रहस्थानत्वेन विशेषः प्रतिज्ञाहान्यादिहेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात् न च विभाजकसूत्रस्य हेत्वे
त्वाभासस्यैवेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परंपरया वानुमितिदोषोन्नायकस्य संग्रहः तथा सति व्यभिचारस्यैवाश्रयसिद्धेरप्युन्नायकस्य तदु
भयोन्नायकपरंपरायाश्च तथात्वापातात् न वाप्राप्तकालतामासादयन्नपि प्रथममुपाध्युपन्यासः कथकसंप्रदायानुरोधादेव कर्तव्यः तादृशसंप्र
दायमननुरुन्धानस्य तदुद्भावकपराभवतः शपथनिवारणीयतापत्तेः तस्मात् प्रथमं शुद्धसाध्यव्यभिचार एवोद्भाव्यः तत्र कथंतायां तत्हेतुत्वेनस्तु ल
साध्यव्यापकोपाधिव्यभिचारः। विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्य उपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः अत्र च विशिष्येक चूर्तायां वि
शिष्टसाध्यव्यापकोपाधिव्यभिचार इति वक्ष्यते व्यभिचारादेरिव तद्व्याप्यत्वादेरपि ज्ञानं व्याप्त्यादिग्रहप्रतिबंधकं। तथा च साध्यव्यभिचारव्याप्योपाधि
व्यभिचारवानयमिति वोद्भावनीयमिति साध्यव्यापकत्वानिश्चयात्तु उपाधित्वे पायिकतदनिश्चयात् अनुकूलतर्कादिना तादृशव्यापकत्वनिश्चये तु सा

संयोगेनधूमवतश्चवन्हिमत्वनियमात्नद्वितीयःपटोजातिमान्
धूमादौवन्हिसामग्र्यादावव्याप्तेःयक्षतावछेदकसाध्यसंयोगेनावृत्तेः
मेयत्वादित्यादौसमवायत्वदावव्याप्तेःवन्हिमत्पर्वतपक्षकेपर्वतोवन्हिमान्धूमादित्यत्रधूमादिवैवन्हिव्यावर्तकेवन्हिसामग्र्यादावतिव्याप्ते
श्चअतएवनेतरोपीत्यादिस्वयमूहनीयंइतिकृतंपल्लवितेन।आपाद्याप्रसिद्धेः।आपाद्यस्यवन्हिव्यापकत्वेसतिधूमाव्यापकत्वस्याप्रसिद्धेः
अनुमितीतिअस्मदुक्तव्यभिचारोन्नायकत्वंतदुन्नयनस्वरूपयोग्यत्वंतद्व्याप्तिपक्षधर्मतारूपंपर्यवसितसाध्यव्यापकत्वादिकंवानुमितिप्र
तिबंधकज्ञानविषयतावच्छेदकमेवेतिभावः।ननुसामान्यलक्षणमितरव्यावृत्त्यौपयिकविशेषलक्षणंतुदूषणतायामुपयुज्यतइत्यत
आहविशेषेति।यथाश्रुतेविछिंनसाध्यव्यापकोपाध्यव्याप्यायक्किंचिद्धर्मावछिन्नसाध्यव्यापकत्वमेववक्तव्यंतथाचवन्हिनाधूमे
नधूमस्यवन्हेर्वासाधनेपक्षेतरस्यतद्रूपज्ञानादनुमितिप्रतिबंधापत्तिरित्यर्थः।व्यवहारोपयिकत्वेचतत्रोपाधिव्यवहारापत्तिः
पर्यवसितेत्यादिअभिधानेवास्मिन्नयनप्रवेशइतिभावः।व्यवहारोपयिकंस्वव्यभिचारेणसाध्यव्यभिचारोन्नायकत्वंलक्षणंतुतत्तत्सा
ध्यसमानाधिकरणत्वेसतितत्तत्साधनव्यापकत्वंसाध्यसाधनभेदाद्भिन्नमेववक्तव्यंभिचारिणःसाधनस्यैवानुप्रवेशाच्चनातिप्रसं
गःनचरूपेणगुरुत्वेसाध्येपृथिवीत्वाश्रावादेरुपाधितापत्तिःगुरुत्वव्यभिचारिरूपव्यक्तेस्तद्व्याप्यत्वात्तदव्याप्यरूपव्यक्तेश्चगुरु
त्वाव्यभिचारात्दूषणौपयिकंतुयथासंभवमननुगतमेवेतिमतमिदंपरेपरिष्कुर्वंतितन्नसाधीयः।तथाहिसाध्यसाधनव्यक्तिस्वरू
पगर्भेनोपाधित्वंअपितुसाध्यतावछेदकसाधनतावछेदकधर्मगर्भंतत्तद्गुणत्वेनसकलगुणव्यक्तिषुसोपाधेरपिद्रव्यत्वस्यगुणत्वे

नसकलगुणेष्वेवनिरुपाधित्वात्गुणत्वेनगुणेसात्त्वेप्यसत्त्वेनरूपेणसोपाधिरपिसत्तायाःगुणकर्मान्यत्वविशिष्टसत्त्वेननिरुपाधित्वात्तथाचतद्रूपावछिंनेसाध्ये
तद्रूपावछिन्नेनकउपाधिरित्यत्रतद्रूपावछिंनसाध्यसमानाधिकरणत्वेसतितद्रूपावछिंनसाध्यसमानाधिकरणत्वेसतितद्रूपावछिंनसाध्यव्यापिकत्वमनुगतंल
क्षणंवाच्यंनतुतद्रूपावछिंनतत्तत्साधनस्यकस्यव्यापकत्वमननुगमात्तथाचगुरुत्वावछिंनसमानाधिकरणस्यरूपत्वावछिन्नाव्यापकस्यपृथिवीत्वाश्रावादेरुपाधित्वं
दुर्वारंव्यभिचारित्वेनसाधनविशेषितत्वंतूपदर्शितमेवेतिसंक्षेपः॥॥उपाधिलक्षणेसाधनाव्यापकत्वांनविशेषणंदूषकतायामनुपयोगात्अव्याप्तिकरञ्चेतिस
त्प्रतिपक्षोन्नायकतत्वेनोपाधेर्दूषकतावादिनामभिप्रायंप्रकाशयतिकेचिदिति।साध्यतावछेदकावछिसाध्यंवनोपाधिःपरंप्रत्युद्भाव्यःसाध्यविशिष्टत्वात्पक्षेसाध्य
नस्यनिश्चयेनुमानस्यवैयर्थ्यात्निश्चयेवतस्यायोगात्संदिग्धोपाधित्वेनापिनतदुद्भावनमित्याहअनुमितीतिद्धेतोसाध्यव्यभिचारःसंदिग्धोपाधिनाअसंदिग्ध
श्चेत्कथंतस्यसंदिग्धोपाधित्वमतितुतत्वंहेत्वव्यभिचेतिव्याप्यसंशयस्यव्यापकसंशयादिहेतुत्वादितिभावः।नचतत्रनाभावःकोटिस्मरणादितएवतदुत
त्तेःकिंचित्तद्वुविधानस्यापिव्याप्यतदभावयोर्व्यापकतदभावसहचर्यस्यगृहीतत्वेनस्मरणाएवोपक्षीणत्वात्तदयहेतुतत्संशयाद्व्यापकसंशयस्याप्यभावादिति
वाच्यंमहानसेकृताशनोनजलहृदइतिस्मरतांपर्वतादिकमपिपश्यतांधूमादिसंशयभावाभावव्याप्यांकृताशनसंशयाभावाभावदर्शनात्तस्यापितद्धेतुत्वात्अतए
वोकटकोटिकव्याप्यसंशयाद्व्यापकस्यानुकटकोटिकःसंशयःकारणोत्कर्षेणैवकार्योत्कर्षात्समानेत्यादिसूत्रंतूपलक्षणंपरंतत्रस्थधकारोवानुकसमुच्चया
र्थइतिरीतिवदेषिकोटिद्वयसहचरितधर्मवत्तयाधर्मज्ञानंहेतुःसधर्मस्यैकत्वंज्ञानस्यचनिश्चयत्वेनोपयुज्यतेगौरवात्अवगाहतेचलिंगसंदेहोलैंगिकतदभाववसह
चरितोलिंगतदभावौधर्मिणितथाचसाधारणधर्मएवास्यैतत्सविहितनवाः।लिंगतदभावयाप्रत्येकमेवैककोटिसाधारण्येपिमिलितयोरसाधारण्यंसत्प्रतिप

स्थले विरुद्धयोरिव हेत्वोरिष्टिटीकाकाराद्यनुयायिनः। इत्थं च साधनाव्यापकत्वसंदेहे साध्यव्यापकत्वव्यभिचारसंदेहात्साध्यव्यभिचारसंदेहो इत्थमेव च दलद्वयेऽसं
हेतौ स्फुट एव साध्यव्यापकसंदेहात्तु साधनव्यापकव्याप्यत्वसंदेहात्साध्ये साधनाव्यापकत्वसंदेहो बोध्यः उपाधेः साध्यव्यापकत्वसंदेहे न हि तत्साधने साध्य
व्यापकव्यभिचारसंदेहात्साध्यव्यभिचारसंदेहः। इत्यमेव च दलद्वये संशयस्थले व्यभिचारसंशयस्योक्तिसंभव इत्यपि वदंति उभयेति एकांशे परस्य एक
विशिष्टापरसाध्यतायां त्वेकोपाधित्वोपस्थस्ये कस्योपाधित्वमिति तु तत्त्वं ईश्वरेति वस्तुतः संधेतावपि तत्त्वाग्रहदशायामुपाधिसंदेहेन व्यभिचारसंदेह इति भा
वः। संदिग्धेति न त्वानैकांतिकत्वसंदेहः प्रतिबंधकः नुनु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यं। अनेकांतिकत्वसंशयात् मम व्याप्तिग्रहो मा भूदि
त्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकता साधकतया जिज्ञासादिद्वारं परस्य संदेहोपयोगित्वेन च तदुद्भावनस्य सांप्रदायिकत्वात् उपाधित्वस्य संशयनिश्च
येव ज्ञायमानं च ज्ञानं अनुमितिविरुद्धितदेव स्याद्दूषकताबीजमित्यभिप्रायेणाह संदिग्धेति तद्व्यतिरेकस्य क्वचिद्व्याप्यस्यैत्वेन च निश्चपक्षधर्म
त्वेन संदिग्धत्वात्त्वबाधोन्नीतेति। ननु बाधवती लेतितत एव हेतोरसाधकत्वात् कृतमुपाधिना न च वा साधारण्यं पक्षस्यैव पक्षत्वात् अनवतीर्णे तु नोपाधित्वं पक्षे तद्
हदशायां तदभावग्रहासंभवादिति भावः व्याप्तिविरहज्ञानाभावद्वारकतां निरस्यति नापीति। अनौपाधिकत्वज्ञानस्य उपाधित्वज्ञानाभावस्य कारणं
विघटकतया कारणाभावरूपता दृशाज्ञानविषयतया अनौपाधिकत्वज्ञानस्य कारणत्वेनान्वयव्यतिरेकसिद्धं परं तु सोपाधित्वज्ञानस्य प्रतिबंधकता
या विना कारणीभूतज्ञानविघटनमसंभवि त्वेन कल्पनीयं सैव त्वासिद्धेति दूषणेत त्यर्यातु यथाश्रुतमेव साधीय इत्यपि वदंति व्याप्यत्वासिद्धे व्याप्यत्वज्ञाने
तत्त्वविः तद्वारा दूषकत्वमिति धर्मिकत्वं परिहरन्नाह नन्वेति न हीति विरोधिविषयत्वाभावेन साक्षात्प्रतिबंधकत्वासंभवादिति भावः साध्यव्याप्यव्यभिचारित्वेन सा

२४

न साध्यव्यापकस्योद्भूतरूपतादृशसाध्याभावेनान्वयन हेतुत्वमिति पक्षेतद्व्यावृत्त्या यस्य साधनस्य संबंधेयत्साधनविशिष्टं साध्यं निवर्तत इति
अर्थस्तु यथाश्रुतग्रंथे स्वरससिद्धः तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः जलं द्रव्यं गंधत्वादित्यादौ पृ
थिवीत्वादावतिव्याप्तिश्च अथास्तिद्धयुन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः जलं गंधवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसंगश्च अथ
यथासंभवमसिद्धेः सत्प्रतिपक्षस्य चोन्नायकत्वं वायुः स्नेहवान् गंधत्वादित्यादौ जलत्वपृथिवीत्वादावव्याप्तिः साधनविशिष्टसाध्याप्रसि
द्धेः साध्यसाधनत्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः विरुद्धिश्च एकैकाभावबुद्धिरुभयवत्ताबोधं विरुद्धस्थले तु भ्रमा
दिरूपतथाविधबाधप्रसिद्ध्या समर्थनीय इत्यपि वदंति यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेनानुगमय्य तदभावोन्नायकत्वे
वाच्यमिति तन्न यत्र भिन्नभिन्नसंबंधेन साध्यसाधनभावः तत्र संधेतुके हेतुतासंपादकेन संबंधेन साध्यस्य साध्यतासंपादकेन च हेतो
रन्यत्रापि च यथाकथंचित्संबंधेतु दुःसयस्याभावोन्नायकेति व्याप्तेः किं च तादृशधर्मशून्यत्वेन पक्षसाधनवं तावति प्रमाविशेष्यत्वेन वा
द्भावनीगतीकृत्य तत्र साध्यव्यावर्तकत्वमर्थमाहुः। तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूषकताबीजं तदा द्वयोरनुगमन
फलं अथा यथासंभवमुभयोन्नायकत्वं तदा वृत्तिहेतुके सत्प्रतिपक्षोन्नायके व्याप्तिरितिय दपि च पक्षतावच्छेदकसाधने च न वर्तते। यत्र च्छे
दकस्य पक्षतावच्छेदकसाधने इति प्रातीतिविशेषस्य वाश्रयसाध्यव्यावर्तकत्वमर्थमाहुः। तत्रापि किं येन संबंधेन हेतुता तेन अथ येन पक्षतावच्छे
दके पक्षे वर्तते उभयेन केनापि तादृशधर्माश्रये साध्यव्यावर्तकत्वमभिमतं नाद्यः जलं वह्निमत् धूमादित्यादौ जलपक्षक वह्निसाध्यके संयोगसंबंधेन साधने

बरत्वात् परंतु सार्वत्रिकत्वेनं तस्येति ध्येयं असाधारणविपर्ययेति इदं सत्प्रतिपक्षो नायकत्वमभिप्रेत्य यद्यपि व्यतिरेकिण्यां सत्प्रतिपक्षत्वे सत्प्रतिपक्षे सत्प्र
तिपक्षांतरस्यादोषत्वान्नेह साधारण्यदोषाय तथापि प्रतिपन्नयनोपाधिक साध्यव्यापकत्वया हेतुकप्रमाणाभावितात्पर्यं। तदर्थं निष्कर्षः। यत्र दोषान्याय
कतया दूषणत्वमुपाधेस्तत्र दुष्टत्वयनोपाधिकरूपैककल्प्यमेवाभासत्वे प्रयोजकत्वं एवं च यत्र स्थापनायां एकतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिप्र
देश्यतत्र पक्षाव्यापकविपर्ययस्याभासत्वे तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षे पक्षैकदेशे साध्याभावस्य प्रत्यूहत्वात् तत्र पक्षतावच्छेदकेन साध्यसिद्धिरुद्देश्या
तत्र तादृश्योपाधित्वमेवैकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधात्साध्यविपर्ययस्याभासत्वमनुपाधित्वेप्रयोजकं न त्वज्ञानं अज्ञानस्यापि तस्य व्या
तिरेकेण सिद्धिसंभवात् पूर्वसाधनव्यतिरेकत्वं तु नोपाधित्वेन नाप्यनुपाधित्वे न नियतं वन्हिना धूमस्य स्थापनायां प्रतिहेतौ वार्द्रेन्धनाभाववन्त्यापादस्योपाधिता
धूमाभावस्यार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वशावार्द्रेन्धनस्यानुपाधितायाश्च प्रसंगात् परंतु पूर्वसाधनस्य व्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रति
पक्षमात्रमुपपद्यते सर्वत्र तत्संभवात् पक्षासत्वेपि स्थापनायां विशेषाग्रहदशायामवसत्प्रतिपक्षोपन्यासात्। वस्तुतः साध्यव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य
इदानीं तत्वेनाग्रहादुपन्याससंभवात्। अतो बलवत्तारानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवासाउपाधित्वेन नउपन्य
स्यत इति यथाकथंचिदिति कदाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेतावित्यर्थः॥ छ ॥ अनुमितिलक्षणे कार्यानुकूलत्वसंगत्या पक्षध
र्मतानिरूपयितुमाह व्याप्तीति संदिग्धेतियत्र साध्यस्य यादृशसंबंधावगाहि निर्णयनिवर्त्यो यः स तत्र तादृशसंबंधेन साध्यानुमितौ पक्षत्वे त्यर्थः तेन न
पक्षसाध्यविनिगमक संशयानुगमो नवासंबंधांतरेण संदेहेपि निर्णीततत्संबंधेन पक्षत्वं नवामतः प्रभृतिषु समवायेनाकाशादेः साधनेतद्धेतुकल्पसंशययो

र्यतां निरस्यति नापीति साधकबाधकमाने सिद्धिबाधौ केवलान्वयिनि च पक्षानिष्ठाभावप्रतियोगित्वधीरेव सुलभोबाधः ननु तत्रापि पुनरनुमित्सातः परामर्शा
त्कं स्मरणात्मकाद्वा परामर्शामिति तीष्ट साधनाविषयकानुमित्सा ततो मितिरिति फलबलात् कल्पनीयमित्यत आह सिसाधयिषेति न त्वानुमितिजनिके छेव
पक्षतासावन्क्वचित्त्वनिष्टवसर्वत्रेश्वरानिष्टवसुलभमितिवाच्यं तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षताप्रसंगात्। न च तस्याः तदानीं न तज्जनकत्वे तोधिनतद्भाग्यवान्पा
वात् न तदुपधानं अनुमितेः पूर्वं तदभावात् न तत्सामग्रीसमवधानं कारणमात्रस्य पक्षता कुक्षिनिक्षेपप्रसंगात् शेषवैयर्थ्यात् तदानीं सामग्रीविरहप्रयोक्तव्यतिरेकप्रतियो
गिनः कारणवक्तव्यतापातात् सिसाधयिषेतियत्रानुमित्सानंतरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षे स्मरणं अनुमितीष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा अनुमि
त्सापूर्वकालो संनविशेषस्मरणाद्वानुमित्साकाले त्वनेंद्रियसंनिकर्षसहिततत्साध्यतद्व्याप्यविशिष्टप्रत्यक्षं तदनंतरं चानुमितिस्तत्र पक्षतासंपत्तये सह कृतां तं साधक
मानविशेषणं सिसाधयिषाव तत्साध्यविशिष्टत्यक्षविषयत्वप्रकारिकानुमितिविषयणीछायत्वकिंच द्वारं ज्ञानं जायतामितीछायामपि सिसाधयिषासत्वेनुमित्यनुत्सा
दाव अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वतो वन्हिज्ञानं जायतामितीछायां प्रत्यक्षानंतरमनुमित्युत्पादाद्य यादृशयादृशेछासत्वे सिद्धौ सत्यामनुमितिः
तदिछाभावसमुदायस्य विशेषणत्वादिछायाः अननुगमेपि न क्षतिः धूमेनानुमिनुयमितीछातदन्यमात्रलिंगकानुमितीछातिरिकानुमितीछा वा वाच्या लिंगविशेषणापि च
वियत्रित पक्षत्वं तल्लिंगकानुमितौ सिद्धिकालीना तल्लिंगकानुमितीछा एव वा प्रतिबंधिसाधमाने साध्यवत्वनिश्चयः पाषाणमयत्वादिना वर्ततेजस्त्वादिना वन्हेः सि
द्धावपि पर्वतत्वेन तत्र वन्हित्वेन वतत्सानुमितेर्धर्मितावसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ यदि न पर्वतत्वसामानाधिकरण्येनैकत्र साध्यसिद्धावपि विनानुमित्सा म
न्यत्र तादृशानुमितिचानुभाविकी तदा धर्मिविशेषोपि निवेश्यो नान्यथा पक्षतावच्छेदकस्य सामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्ष

तावच्छेदकावच्छेदेनैकेनानुमितिं प्रति तदवच्छेदेन सिध्येत सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वं इत्थं च लिंगभेदन्यायोनुसरणीयः साध्यविशेष्यकसि
ध्यनंतरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वेनां प्रतिपक्षविशेष्यकेव सिद्धिर्विरोधिनी एवं च पक्षविशेष्यकसिध्यनंतरमपि साध्यविशेषकानुमितिर्जायते तुल्यबलन्या
यत्वात् समानाधिकारासिद्धेः प्रतिबंधकत्वे पर्यवसानात् तादृशानुमितिं प्रति सिद्धिमात्रविरोधि साध्यप्रसिद्धिरेव वा अत एव प्रसिद्धिसाध्यकस्थले पक्षविशेषिकेवानुमितिस्तथैव
कारिणी सूत्रस्य विशिष्टाभावस्य संपन्नेरित्युपाध्यायाः अन्ये तु द्वित्रक्षणात्मकतायामप्यनुमित्सायामनुमितिदर्शनादनुमित्सायोग्यतावत्त्वात् सा न स्वोत्पत्त्यनंतरं लिं
गदर्शनादिक्रमेण यावता कालेन उत्पत्तेः परामर्शो जायते तावानेव कालः फलबलेन तथा कल्पनात् अथवानुमित्सोत्पत्त्यनंतरं अनुमित्सानाशे सिद्धौ सत्यां याव
त्कालमध्येनुमितिर्जायते तावानेव कालोनुमित्साच्छायापलक्षितः यत्र त्वासिध्यनंतरं तेनारोपि द्वित्रिक्षणे विनानुमित्सामनुमित्यनुत्पादोनुभवसिद्धः तदा सिध्यापि
पितावानेव समय उपलक्षणीयः विशिष्यक्षणनियमस्य विहितैः करणीय इति वदंति अत्र च यत्र साध्यनिर्णयेच्छानंतरं पूर्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य
प्रत्यक्षस्मरणं वा यत्र वा साध्यतद्व्याप्यधर्मतादृशव्याप्यधर्मांतरविशिष्टपक्षस्य तत्र स पक्षस्य पक्षक साध्यतद्व्याप्यवत्त्वानुमित्योः सिद्धसाधनताया नैकस्मरणं
४ स्वविषयसिध्यनुत्पादः अनुमित्सोत्तरमंतरानुमित्यनुत्पादे द्विदिवसादिविलंबेनेंद्रियादिनानिनत्तृतीयसाध्ये लिंगपरामर्शादनुमितिप्रसंगात् किंचानुमित्सानंतरं ४
तत्तत्स्यैवयोरनुमित्सातः साध्यतद्व्याप्यवत्त्वानुमितिप्रसंगतः याप्यता विवक्षणीया सुतरामेवेति तदिच्छाविषयसिध्यानुपहितत्वं विशेषणं पक्षसाध्यभेदेन च पक्षता
याः भेदात् स्वपक्षपूर्वकार्यकारणभावः तथा च यत्र सिध्यनंतरं कदाप्यनुमितिर्न जाता तत्र सिध्यभावमात्रं कारणं न तु नेच्छाविशेषापि गौरवात् प्रयोजनाभावाच्चेति
नयत्पक्षकयत्साध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्तिमात्रसंपादनायेच्छाभिधानाया सानायादेयः यत्र तु सिसाधयिषाविरहविशिष्टस्वलक्षाव्यवहिता

ध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः तत्सामग्र्यादेरदूषणत्वेति शेषः। दूषकताबीजं चिंतनमिति निश्चयदशायामधिकत्वयत्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्व
तत्संशये द्वारात्तत्संशयस्यापि तथात्वमिति भावः। व्यभिचारज्ञानद्वारेति मानसे व्यभिचारनिश्चय उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते व्यभिचारानुमाने पुनर
ग्रे वक्ष्यति व्याप्तीति साध्यसंबंधितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसंबंधितानवच्छेदकत्वरूपपर्यवसन्नः साध्यवदन्यवृत्तित्वविरहो वा नेति भावः ननु स्वस
मानाधिकरणात्यंताभावप्रतियोगिसाध्यकत्वरूपत्वस्यानुगतस्याभावेन तत्तत्साधनपर्यवसाने साध्यप्रसिद्धमात्रेणैव कृतार्थत्वात् साध्यव्यापकोपाधिव्यभिचारित्वेन हेतो
साध्यव्यभिचारित्वे साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु न व्याः। व्यतिरेकिणि साध्ये धने व्याप्तिविरहस्य व्यभिचारस्य चानयन उपाधिः
साधनाभाववद्वृत्तित्वं व्यभिचारास्फुटतायां उपाध्यनुसरणाद्यत्रापि करणे हेतोः साध्यव्यभिचारित्वे तदीयधर्मेनास्य साध्यव्यापकत्वग्रह इति भावः। उपाधिमात्रेपि तत्रापि त
थाविरोधिसंभवादिभावः वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वं व्याप्यव्यापकभावव्याघातायपत्त्याहेतोः साध्यव्याप्यत्वेन साधनताभाववद्वृत्तित्वस्य साध्य
व्यापकत्वान्नोपाधित्वमिति अवधेयमिति व्याप्यत्वाभावसाधनाभिप्रायेण साधनाव्याप्यत्वस्योपाधित्वाभावेनैव दोषः। साधनेति यत्पदोक्तताभिः प्रावेषप्रतियोगिव्यधिकरणस्य
धनाभाववद्वृत्तित्वस्य चैतो तथात्वासंभवात् एवं च सत्प्रतिपक्षे निश्चितोपाधिवत् संदिग्धोपाधिरुद्भाव्यः न च तत्र तस्य व्यभिचारसंदेहस्य प्रतिहेतुसमानादेवसिद्धेः
किं तेनेति वाच्यं परस्परप्रतिबंधेनैवानुमित्यनुत्पादे तत्र व्यभिचारसंदेहे स्याद्वस्तुस्थत्वतौ मानाभावात् उपाधिसंदेहात् विशिष्टैकत्र व्यभिचारसंदेहे न तु तुल्यबल
त्वाभावात् न चातुल्यबलेन सत्प्रतिपक्षे व्यभिचारादिशंकावाधानं वा स्वरतः संदिग्धव्यभिचारादिरनापि तथात्वप्रसंगादिति अत्र वक्ष्यति द्रुपाधेस्तुल्यबल
त्वे सत्प्रतिपक्षोनायकतयात्कोटिसाम्याधिकबलत्वेन बाधोन्नायकतयापि दूषकताव्याप्त्यादिप्रतिसंधाने तदुन्नयनस्य तत्तोनुमितिं प्रति राधस्य तु

नु

यएवक्षणइतिनातिप्रसंगः नचादिमेषु परामर्शस्थितिक्षणेयत्रविरोधिसिध्यादिविना शास्तचोत्तरक्षणेमितिर्नस्यात परामर्शस्यात थावानुमितिवाच्यं । अनुमिति
सामग्र्याः विरोधिन्याविरहेणतदानीमुत्पन्नादनुव्यवसायादेरंततः संस्काराद्वातत्संभवात् संस्कारजन्यत्वेनस्मृतित्वस्य प्रागेवनिरासात् त्वाद्वास्वसमानाधिकरणा
नुमित्यव्यवहितपूर्वक्षणवर्तिभिन्नत्वेनस्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षणवर्तित्वविशिष्टत्वेनस्वसमानाधिकरणानुमित्युत्पत्यनधिकर
णसमयाव्यवहितपूर्वक्षणवर्तित्वविशिष्टत्वेनवाप्रतिबंधकत्वतदव्यवहितपूर्वत्वंचतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वंनचात्रप्रथमेयत्र सिध्यात्मकप
रामर्शानंतरं सिसाधयिषायाः उत्पादकालेतत्पुरुषीयस्यकस्यापि धर्मेनविनाशानंतरंपुनरनुमितिस्तत्र तदुत्पादनसमयेपिसास्यात्पूर्वकालीनानांसर्वेषांता
दृशपूर्ववर्तित्वेनाविरोधित्वादितिवाच्यंअनवरतपरिस्पंदमानापरिमितएवानादिपरमाणुचेतनसंयोगसंतानांतःपातित्यक्तीनामविरतमेवोपरमात्फल
नुत्पादेबलेनापितादृशाक्लृप्तनासंभवात् कारणांतरकल्पनेगौरवात् अन्वयव्यभिचारसंदेहस्यकरणत्वग्रहाविरोधित्वात् उपादीयंतांवातत्तदात्मसमघीव
शेषसंबंधाएवतादृशपूर्ववर्तिभिंनाःभवेद्वातत्तत्पुरुषीयाअनुमितिंप्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादीनातादृशक्षणवर्तित्वविशिष्टत्वादिनावाका
रणत्वंतथाचोपाध्यादेःप्रणांतरत्वभङ्ग्योतसर्वत्रानुमितिसामग्रीसंभवाद्दिलीयतेनचपरामर्शत्वादिनाकारणत्वंवधत्वादिनाचप्रतिबंधकत्वंअनयैवरीत्या
कार्यांतरेष्वपिक्लृप्तानांकारणानांप्रतिबंधकानांवातथात्वेअक्लृप्तानांचतथात्वंप्रसज्येतअतएवनद्वितीयोपिप्रकारोवैयर्थ्याच्चसिद्धेःसिसाधयिषाविरह
विशिष्टस्यसिध्यनुमानातिरिक्तसाधकमनयोरन्यतरस्याभावःकारणमितिहेतुकेचित्तन्नसाधकंहिमानंसिद्धिस्वरूपयोग्ययदुपहिततत्सामग्रीवानाद्यःच
क्षुरादिसत्वेविनानुमित्सामनुमित्यभावप्रसंगात्नद्वितीयःसिद्धेःपूर्वंतदुपहितत्वाभावेनप्रत्ययासामग्रीसत्वेप्यनुमित्यापत्तेःअनुमानातिरिक्तेत्यस्यवैयर्थ्या

२०

च्चतृतीयःअनुमितिसामग्र्याभावत्वेनप्रत्यक्षकारणत्वंअनुमितित्साविरहविशिष्टप्रत्यक्षसामग्र्याभावत्वेनवानुमितिकारणत्वमित्यन्योन्याश्रयात्स्थाणुत्वाभावव्याप्य
दर्शनक्षणेप्रतियोग्यारोपविरहेणाभावप्रत्यक्षेसामग्रीविरहात्यक्षतासत्वेस्थाणुत्वारोपक्षणेतदभावानुमित्यापत्तेरितिकश्चित् वस्तुतस्तत्वतंत्रान्वयव्यतिरेकशा
लित्वांनियमेवप्रथममुपस्थितत्वात्लाघवाच्चप्रत्येकमेवतथात्वमन्यथाबाधादेरपिअत्रैवांतर्भावप्रसंगाच्चनचानुमित्साविरहस्यप्रत्येकविशेषणत्वेगौरवं।शाब्दसि
द्धौसत्यामशाब्दंज्ञानंजायतामितीच्छायामनुमितेरुत्पादात् सिद्धामनुमितिविषयेच्छाविरहस्यप्रत्यक्षसामग्रीसत्वेतादृशेच्छायामनुमित्यनुत्पादात्साधकमानेनु
मितित्वादिप्रकारिकेच्छाविरहस्यपृथगेवविशेषणतायास्त्वयापिवाच्यात्वत्त्वनिवर्तकप्रत्यक्षादिसामग्रीसमविहितान्यत्वादिनाचतादृशेच्छयोननुगमेतीव
गौरवंअन्यतरत्वघटकयोरन्योन्याभावयोर्मिथोविशेषणविशेषणविशेष्याभावेविनिगमकाभावाच्च।अतमनिष्ठस्वसमवायेनसिद्धेरभावःकारणंभिन्नभिन्ने
नत्वतदसाधारणकारणरूपायास्तत्सामग्र्याःमणिविशिष्टस्यवन्हेरिवेतरविशिष्टस्यमनोयोगादेःप्रतिबंधकत्वायोगात्तथाचकथमनुगतरूपेणतयोरभावःका
रणमितिरेवंसिद्धेःसिसाधयिषाविरहेवैशिष्ट्यंएककालावच्छेदेनएकात्मवृत्तित्वंप्रत्यक्षादिकारणचक्षुःसंयोगादेस्तन्यादृशाभितिसामग्रीविशेषाभावस्यहेतुत्वे
पिलाघवात् सिध्यभावएवपक्षव्यवहारनिमित्तंएतदेवाभिसंधायप्रवृत्तिनिमित्तमुक्तमितिवक्ष्यतिफलानुपहितसिद्धौच्छाविरहविसिष्टसिध्यभावापेक्षया
बाधाभावस्यलघुत्वेपिसिद्धसाधनस्थलेपक्षव्यवहारविरहेणतादृशसिध्यभावस्यवश्यकत्वेबाधाभावोनभिविशतेगौरवात्विशिष्टसिध्यभावस्यात्मनिष्ठस्ये
वानुमितिहेतुत्वेपितस्यपरंपरासंबंधादेवपर्वतादौपक्षव्यवहारइतिबुध्येयंएकस्यपुंसोनुमित्सासत्वेप्यन्यस्यतद्विरहेणःप्रत्यक्षसामग्रीसत्वेनुमित्यनुत्पादात्तत्पु
रुषीयानुमितिंप्रतितत्पुरुषीयानुमित्साविरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहोनन्यगत्याहेतुरूपेतव्यइतिर्वदंति।अथसिध्युत्तरानुमितौसिषाधयिषा

हेतुरस्तु नत्वेवंमण्यादिस्थलीयदाहंप्रत्युत्तेकस्यहेतुत्वापत्तिः उत्तेजकानामननुगतत्वात्तावदभावविशिष्टमण्याद्यभावस्यचाननुगतत्वाजितेत्र इहापिदर्शि
तोननुगमः सिसाधयिषायाः सिध्युत्तरानुमितित्वंचाननुगतानतिप्रसक्तंदुर्वचं सिद्धिस्थितिकालीनांस्वेतरसिद्धिकालीनांवानुमितिंप्रतिहेतुत्वकल्पनेचविनापिसिषा
धयिषांसिद्धिनाशकालेनुमित्युत्पादोदुर्वारः एकस्यचपुंसः सिद्धिसत्वेन्यस्यसिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसंगश्च तत्पुरुषीयतादृशानुमितिंप्रतिसिषाधयि
षायाः हेतुत्वेनंतकार्यकारणभावप्रसंगः अपिच सिद्धौसत्यांविनापिसिषाधयिषायांसामान्यसामग्रीतोनुमितिसामान्योत्पत्तिप्रसंगात् नहीदृशविशेषसामग्रींविना
सामान्यसामग्र्याः अनुमितिजनकत्वंनास्तिनचान्यत्रापितद्विशेषसामग्र्यंतरमस्तितत्कल्पनेचातिगौरवं इहजायमानासासिध्युत्तरास्यात् साचनाजायतेतत्का
रणाभावादितिचेत् समाजनिष्टअनुमितिसामान्यंतुस्यादेवकार्यानुत्पादस्यविनाकारणाभावसमवकारणाभावसंभवात्करणव्यापारत्वेनावश्यकारणाभा
वस्यपरामर्शस्यकारणतावच्छेदकापक्षतानकारणमितितुभ्रमः प्रतिबंधकांतराभाववदन्वयव्यतिरेकशालित्वेनहेतुत्वात् अन्यथायथासंभवंनिमित्त
कारणस्यसमवायिकारणत्वाद्यनवच्छेदकेप्रसंगात् अथानुमितिसाधारणसिद्धेः प्रतिबंधकत्वे तदभावस्यमण्याद्यभाववत्प्रतिबंधकाभावत्वेनकार्यकाल
वृत्तेरेवहेतुत्ववदनुमितिकालेनतदसंभवात् सानोत्पद्येतेतिचेत् नयस्यमण्याद्यभावादेः कार्यसमकालतयान्वयव्यतिरेकित्वंतस्यैवतथात्वेनहेतुत्वेनतुसर्वस्य
गौरवात् अन्यथासमवायिकारणस्यकार्यसहभूतस्यैवहेतुत्वात्कारणमात्रस्यतथात्वप्रसक्तेः प्राभाकराएवविजयेरन्निति प्राभाकरास्तु विनाप्यनुमित्सां
कांचित्परामर्शादनुमितिप्रवाहस्याविरलत्वग्रस्यानुभविकत्वात्कालभेदकल्पनायांचमानाभावात् मानाभावाच्च पक्षतानामनुमितिहेतुपरार्थानुमानेतुसि
ध्यसाधनमर्थांतरंवधियादूषणमित्याहुः लक्षणापो[illegible]हुातेनविशिष्टज्ञानस्यकारणत्वंव्यवस्थापयतिपक्षेत्यादिव्याप्तिस्मरणेस्मरणत्वविवक्षितंअव्या ति

तरक्षणोत्पत्तिकानुमितिभिन्नायाःसिद्धेः सिसाधयिषाविरहविशिष्टायास्तस्याः अभावः पक्षता अथ तृतीयक्षणाव्यवधायकद्वितीयक्षणएवाव्यवहितत्वपर्यव
सानात् तत्राविरलक्रमेणसिद्धिसिसाधयिषानुमितस्तत्रद्वितीयक्षणेपक्षतासंपत्तयेद्वितीयः सिसाधयिषानुमितस्तत्रद्वितीयक्षणेपक्षतासंपत्तयेद्वितीयः सिसाधयि
षाविरहोविशेषणमस्तुसिद्धेः प्राथमिकस्तुस्वलक्षणस्यकिमर्थमितिचेत् यत्रक्रमेणसिसाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्रपक्षतासंपत्त्यर्थमिति
तन्न यत्रानुमित्सानाशकालेप्रत्यक्षकीसिद्धिरपरामर्शानुमितिस्तत्रपक्षताविरहप्रसंगात् अथप्रथमंक्षणमपेक्ष्यद्वितीयस्यैवद्वितीयमपेक्ष्यतृतीयस्याव्य
वहितोत्तरत्वंस्वध्वंसाधिकरणकालध्वंसानधिकरणत्वेसतिस्वाधिकरणकालध्वंसाधिकरणत्वंवातादृशाव्यवहितोत्तरत्वंवाच्यंतथाचयत्क्रमेणसिद्धिसिसाध
यिषानुमितयः तत्प्रथमक्षणेपक्षतावारणायोत्तरक्षणस्यविशेषणंप्रथमविशिष्टंतद्वितीयंतुसिद्धेस्तत्रैवद्वितीयक्षणेपक्षतासंपत्तयेयदिपुनरिच्छाजनिकासाम
ग्रीप्रतिबध्नात्यनुमितिंतदानुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नंसिध्यभावमात्रंपक्षतेतिचेत् तादृशसिद्धीनांतत्तद्व्यक्तित्वेनाभावः कारणंनिरुक्तरूपविशिष्टत्वे
नवानाद्यः अनंतकार्यकारणभावप्रसंगात् तादृशसकलसिद्ध्यावनुमित्साविरहविशेषणदानस्यवैयर्थ्यात् ततत्समयसंबंधव्यक्तीनांतत्तत्समयावच्छिन्न
तत्तन्मनोयोगादीनांवाप्रतिबंधकत्वप्रसंगा[illegible]नांत्यः सत्यपिपरामर्शादौकस्याश्चित्सिद्धेरनंतरमनुमितिःकस्याश्चिन्नेत्यत्रनियामकाभावात् नवाकारणतावच्छेद
कावच्छिन्नसमाजाधीनकार्योत्पादादिकेकारणतावच्छेदककोटौनिविशतेतथासतितूत्पत्तिकालावच्छिन्नत्वविशेषितेनस्वलक्षणाव्यवहितोत्तरक्षणो
त्पत्तिकस्वसमानाधिकरणमितिसविषयत्वेनस्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयतेस्वलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमाना
धिकरणानुमितिकभिन्नसविषयत्वेनवाकिंवास्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्तिविशिष्टज्ञानत्वादिनाकारणत्वंस्यात् अव्यवहितोत्तरस्थद्विती

ताज्ञानत्वेनपक्षधर्मत्वेनतायह प्रकारीसिद्धधर्मावच्छिन्नव्याप्तिज्ञानत्वेनचैकरूपेणाकारत्वे नातिगौरवात् विनिगमनाविरहाच्च तत्वापि नियतपूर्ववर्तित्वं कल्प्यमित्यत्रव्यत्रे
व्याप्तिनविनेतितथाच व्यभिचारात्कारणत्वे बाधितमितिभावः स्वतोव्यभिचारं निरस्यतिअस्मदुक्तेति।अनवस्थानादितित्न धूमांतरसंनिकर्षेतद्व्यक्तिचित्तिधूमत्ववन्हि
व्याप्तिव्याप्तिमितिलिंगविशेष्यकपरामर्शाद्व्याप्यनुमितिसंभवः धूममात्रासन्निकर्षेपितत्रवन्ह्यनुमानात्तद्व्यक्तिवृत्तिधूमवत्त्ववत्त्ववैशिष्ट्याग्राहकविरहाच्चअसाधा
रणमितिशरीरादिव्युदासः।आलोकादिवारणाय प्रमाणांतरसहकारीतिवा यतदपिप्रमाणांतरंसहत्यैवप्रत्यक्षादिप्रमाकरणत्वेषत्वविशाबागानतद्व्याघातइतिकश्चित्।यद्वासाधा
रणमसमवहितंतथाचयज्जातीयप्रमायामन्यैनोन्यकरणेत्वेनासमविहितंतद्बहिर्विषयकप्रमोत्पादकंयज्जातीयप्रमासामग्रीविरहेवायत्प्रमोत्पादकंतत्तज्जातीयप्र
महेतुरित्येवव्याप्तिः।ततश्चसिद्धार्थाविलक्षणेरतत्करणेकल्पनीयेआवश्यकत्वाद्बाधकाभावाच्चतस्यैवतथात्वंपर्यवस्यतीतिसंशयस्वप्नेन नविशिष्टानुभव
रूपोयेनोपनयनादिवशाद्बहिर्विषयानुभवजननेकुत्यशक्तिकेनमनसादोषवशादप्रमेवतदभावादिवशात्प्रमाअपिजनयितव्येत्याशंकनात्किंतु धर्मिज्ञा
नकोटिस्मरणादिरूपोधर्मिज्ञानंपुनरनुभवरूपंयथासंभ्रमक्षेदेस्मरणंच संस्कारादित्याशयेनाह संशयेति व्याप्यत्वानुमानादितिधूमत्वादौवन्ह्यत्वादिव्याप्यत्वे
ज्ञानात्तुधूमत्वत्वादिनातद्वत्वनिश्चयदशायांअन्यदात्वसंसर्गाग्रहादेवेतिअतीन्द्रियादौलिंगव्याप्यत्वप्रकारकज्ञानस्यासंभवेप्यनुमितिः सर्वानुभवसिद्धत
यातस्यकारत्वेबाधितेपरिशेषाद्धेतोरपिव्याप्यतावच्छेदकप्रकारकज्ञानस्यहेतुत्वेसिद्धेशाब्दव्याप्यताबोधस्थलेपितत्कल्प्यतेकारणंविनाकार्यात्पत्तेरभावा
त्तेनतत्रविनात्रानुमितिसिद्धत्वात्ननतस्यापिहेतुताबाधः तत्वांतीलिंगादौसर्वानुभवसिद्धायाअप्यनुमितेः सर्वथैवापलापः समहुक्तं चिरकालविलंबादिमा
त्रकल्पनमित्याशयवानाहअतएवेति।तुल्यमित्युपगमवादः यत्रयदवच्छिन्नेयदाहितदभावेनतदभावव्याप्यतयागृहीतेनवाविशिष्टेनतत्संशयः यथा

२०

यदवच्छेदेनतद्व्यावर्तकदर्शनतद्विशिष्टेपिअनुभवलात्व्यावर्तकश्चतदभावोयदवच्छेदेनवातदभावोवगतोयोवातदभावव्याप्यत्वेनगृहीतः यथास्थाणुत्वा
भावस्यपुरुषत्वावच्छेदेनगृहेपुरुषत्वस्यस्थाणुत्वाभावव्याप्यत्वेनगृहीतस्यकरादेर्वाइदंत्वावच्छेदेनग्रहेपुरुषोयंवास्थाणुर्वानेतिनसंशयः तदभावोदिव
च्च तद्वदभावादिः तादात्म्येनसंशये तदन्योन्याभावादिरपिद्रष्टव्यः एवंनतद्धर्मोपिविशेषदर्शनस्यविपरीतज्ञानमात्रविरोधित्वादित्यग्रेव्यक्तीभविष्यति
नन्वित्यादिइदंनीलत्वेनप्रमीयमाननभावोवाभावत्वाभावत्वयोस्तत्वयोरित्यर्थः।लिंगत्वाभावादप्रसिद्धत्वेनतत्वासंभवात्भावत्वाभावत्वेत्यादिकंकेवला
न्वयानुमानमितितेवाभावमभ्युपेत्यकेवलान्वयिनः साध्यस्यधर्ममात्रमेवव्याप्यमितिध्येयंएवमितिलिंगव्याप्यत्वेलिंगतावच्छेदकंवावन्हौयद्व्यतिरेकि
तियत्संशयव्यतिरेकनिश्चयादित्यत्रव्याख्याततत्वमतत्यद्वातद्व्यतिरेकनिश्चयेकार्यानुत्पत्तौतद्व्यतिरेकनिश्चयाभावस्यकारणतामपेक्ष्यतन्निश्चयस्यै
वकारणत्वमुक्तंलाघवादित्यभिप्रायकमिदं।अतएवकुत्यानियतपूर्वभावतयाभेदग्रहाभावएवानुमितिहेतुरित्यभिप्रेत्यास्तकेवेतिवक्ष्यतिसामान्यतोवि
शेषदर्शनात्सामान्यतोभ्रमोनस्यात्विशेषतस्तुस्यादेवेत्यभिप्रायिकामाशंकांनिरस्यतिनचेति।अस्तुवेतिअभ्युपगमवादः नचेत्यादिभेदज्ञानस्यात्वेतु
त्वेभेदग्रहः प्रतिबंधिकोनभवितुमर्हतिअभेदितितथाचतथात्वेतस्यापिप्रतिबंधकत्वामनायत्यावक्तव्यत्वमितिभावः।अथास्तुतेरस्यासंदिग्धो त्वेव्य व
भिचारमाह त्वयापीति।विशेषणांतरदानेचाप्रयोजकमितिभावः गोत्वेगोपदशक्यतावच्छेदकत्वंविशेषितंवातदस्तीत्यतोमधुरत्वेतिमधुरत्वव्याप्यो
धर्मोजातिरखंडोपाधिरितिफलतोनविशेषः।गौरितिज्ञानेगौरत्वप्रकारकत्वविशेषमाशंक्याहअन्यथेति।व्यक्तेःप्रकारकत्वेपिलिंगतावच्छेदकत्वासंभ

बाद्य हगवेतरेति गोत्वस्यापि प्रवेशान्नात्माश्रयः। अत्र च यथा साध्यं गवेतरासमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवारणाय समवायसंबंधेन हेतुत्व
स्यावश्यवाच्यत्वेनाभावादिसाधारण्येप्यदोषात् व्यतिरेकीपरूपांतरेणसंबंधांतरेण गोत्वासावस्यापि व्यभिचारतया गवेतरासमवेतस्य तत्वेन समवायसंबंध
नोक्तु तस्याव स्यावाच्यत्वेनाभावादिसाधारण्येप्यदोषात् भावस्य वगमत्वात् [illegible]ग लिंगतावच्छेदकत्वासंसर्गावच्छेदकत्वं तथा च न व्यभिचारः। न त
थानतेन व्यभिचारवारणं नहीति धूमाद्यान्यत्वमितिदृष्टांतार्थं न वैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्वयस्य तत्त्व एव गौरवमिति वाच्यं तादृशो व धर्मघ
टकानेकभेदादिघटकतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेनावच्छेदकत्वौचित्यात् अन्यथा वन्ह्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं
स्यात् अन्वयेति विशेषणदर्शनं हि विपरीतज्ञानविरोधितया प्रत्यक्षउपयुज्यते तत्त्वे सान्यतरत्वं दर्शनस्यापि व्यावृत्त धर्मदर्शनत्वेनाक्षतं अत्र
चतदन्यान्यत्वस्यातिरिक्तत्व धूमवत्त्वादेस्तदवृत्तित्वात् धूमत्वादिरूपत्वेपि च धूमत्वादेरप्रवेशात् लिंगत्वे [illegible] पि न वैयर्थ्यमित्यपि द्रष्टव्यं एवं चान्य
तरत्वस्य व्याप्यतानवच्छेदकत्वेपि तथा तदवच्छेदेन वह्न्युपगमे तत्वान्यथाख्यातिस्वीकारप्रसंगः। अस्तु वा गुरुरपि धर्मः संभवच्छेदकस्तथापि शुद्धव्याप्तिप्रकार
कज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह किंचेति वह्नीत्यादि व्याप्त्येव्याप्यतानवच्छेदकत्वादिति भावः। मानाभावादिति वस्तुतो विशेष व्याप्त्यवच्छिन्नामह
व्याप्तिरीतिरित्यतो किं तेन न हि वस्तुतो व्याप्यवच्छेदकप्रकारक पक्षधर्मताज्ञानं हेतुरिति प्रसंगात् परंतु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकं न च तदानीं
व्याप्यवच्छेदेन व्याप्तिर्गृह्यते न च तदंशे ग्रहे अनुरीतिरल्पमनीयामानाभावात् कल्पत्वाविशेषेल घुरूपावच्छिंनस्यैव नियतपूर्ववर्तितायाः कल्पयितुंयुक्त

अव्यापकत्वात् लघ्वात्प्रथमोपस्थितत्वलाघवात् कल्पनालाघवमाहपरामर्शेति परामर्शहेतुत्वादिनाप्यनुमितेः पूर्वतादृशज्ञानमवश्यंमंतव्यं तथा चातिरिक्तधर्मिणा
स्तत्रानन्यथासिद्धनियमपूर्ववर्तित्वयोः कल्पनामपेक्ष्योभयवादिसिद्धनियतपूर्ववर्तित्वेनानन्यथासिद्धत्वमात्रकल्पनाल घीयसीति ननु धूमत्वावच्छेदेन व्याप्तेरा
लोकत्वे न च पक्षधर्मतायाः ग्रहेपि अनुमितिस्यादित्यत आह एवमिति यद्धर्मावच्छेदेन व्याप्तिज्ञानं तेनैव रूपेण पक्षधर्मताज्ञानं हेतुरिति नातिप्रसंगः ज्ञानद्वयादिति
द्वित्वमविवक्षितं लाघवात् अवच्छेदकलाघवात् अवश्यकत्वात् व्याप्यतावच्छेदकत्वप्रकारकज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुत्वोत्तायाः आवश्यकत्वात् क्वचिदुपजीव्यत्वा
दिपाठः उपजीव्यं च व्याप्तिज्ञानं विनायद्धर्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मताज्ञानस्यासंभवात् एवं च सिद्धेः व्याप्तिज्ञाने हेतावतिप्रसंगभंगाय पक्षधर्मतावि
षयत्वमवच्छेदकं कल्प्यते लाघवात् न तु कारणांतरं गौरवादिति भावः सिद्धस्य न पक्षधर्मताविषयत्वमित्याशयेनाह तस्यैवेति। यद्वा व्याप्यत्वज्ञानमिति व्याप्यत्वप्रकारकंप
क्षधर्मताज्ञानमित्यर्थः ननु विशिष्टज्ञानान्यथानुपपत्या ज्ञानद्वयस्यावश्यवाच्यतया तस्यैव हेतुत्वमुक्तं तदिदमुक्तमावश्यकत्वात् दआह उपजीव्यत्वादिति विशिष्टज्ञाना
न्यथानुपपत्यात कल्पनेविशिष्टज्ञानस्यान्यथानुपपत्कल्पने विशिष्टज्ञानस्योन्यथानुपपत्या कल्पनेविशिष्टनस्योपजीव्यत्वादित्यर्थः। स्वसंवेदनसिद्धमेज्ञानद्वय
मावश्यकत्वं च तस्योभयवादिसिद्धत्वमित्याशयेनाह तस्यैति आसिद्धिं परिजीहीर्षुराशंकते अथेति। अयं पक्षवृत्तिः हेतुरिति लाघवादिति शेषः अनुमितिसामग्र्या इतिस्व
तिहेतुतावादिनां नव्यानां नये दूषणमिदं न तु संस्कारकारणवादिनां प्राचामिति अथेत्यादि अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतप्राप्तिवैशिष्ट्याभानमनंतरं च गृहीते
पक्षेतादृशविशिष्टधीस्तत्रेत्यपि द्रष्टव्यं प्रथमतरइति विशिष्टज्ञानात् पूर्वमनुमितिसामग्रीविरहदर्शनाय एवं च सिद्धेपूर्ववर्तिविशिष्टज्ञाने तस्यैव तत्त्वेन हेतुत्वे गुरुधर्मद्वया
वच्छेदेनानन्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथासिद्ध्यत्वाकल्पनायाएव न्याय्यत्वात् गृह्यमाणाव्याप्यवच्छेदकताकधर्मप्रकारणाकपक्षधर्मता

तेलाघवात् नियमादेरेकतररूपावच्छेदेनाप्यक्लृप्तत्वादित्याशयवानाह अपिचेति ननु स्वसमानाधिकरणधनवानयमित्यादिज्ञानादप्यनुमितिप्रसंगेनतत्
द्दशवन्हिसमानाधिकरणधूमवत्वं व्याप्तिः तत्प्रकारकमेव पक्षधर्मताज्ञानमनुगतमपि हेतुरिति निरुक्तणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमा
दिकमेव विशिष्योपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवन्हित्वावच्छिन्नवन्हिसमानाधिकरण्यवृत्वं तथा च यधर्मविशिष्टस
मानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वं अयं वन्हिव्याप्यवान्धूमो वन्हिव्याप्यो
यं धूमवान्वन्हिधूमव्यापकोयं धूमवानित्यादिसकलत्वम्निव्यापकत्वात् किंचान्यथा व्याप्तिविशिष्टधूमादिसमानाधिकरणात्यंताभावप्रतियोगिगमनस
मानाधिकरणधूमादिमानयमितिज्ञानादनुमित्यंगीकारादखंडव्याप्त्येव प्रसिद्धतया प्रकारत्वासंभवात् साध्ये साधनव्यापकत्वग्राहकमधिकरणादौ
त्वसाधीयत्वाद्यवगाहि पक्षे च तादृशसाधनवत्त्वावगाहि यज्ञानं तत्वेन कारणत्वं वाच्यं तथा च लाघवात् तादृशव्यापकत्वपक्षधर्मत्वावगाहित्वयोरेव कार
णतावच्छेदकत्वं अवच्छिन्ने हेतुत्वानुरोधेन व्यापकत्वस्यापि खंडशोभिरुक्तिस्तेषां परमतं विच्यते यथाव सामानाधिकरण्यज्ञानस्याहेतुत्वेपि न क्षतिस्तथाव
क्ष्यत इति चेन्न गृह्यमाणव्याप्यवच्छेदकताकेति प्रकारद्वयोक्तदूषणगणयस्त्वात् वन्ह्यत्यंताभाववद्वृत्तिधर्मवानयमित्यादिज्ञानाद्वृत्तिधर्मवानय
मित्यादिज्ञानादप्यनुमित्युदयाद्व्यभिचारज्ञानविरोधिज्ञाने विषयत्वेनैव व्याप्तिनामननुगमात् तेनत्र कारणे कार्यमेव प्रमाणं तत्र कारणकार्यत्वा
वग्रहे सति स्यात् स एव तु न संभवति गौरवज्ञानेन प्रतिबंधादित्यत आह कारणताग्रहेति । कारणतानिर्णयं विनात फलस्य धर्म्यं तन्निर्णयस्यासावेन तद्दृष्ट १२ ख

गौरवस्यानिर्णयादित्यर्थः संभाव्यते तावदिदं धर्म्यंतरकल्पनं विना कारणत्वस्यैवाशक्यनिर्वाहत्वादिति चेत् संभाव्यतां न त्वसति बंधकसामान्यतः कार्यकारण
ग्रहस्य प्रायशो विरुद्ध्यप्रसंगात् तत्र तत्र क्लृप्त्यनियतपूर्ववर्तितावच्छेदकरूपांतरविरहेणागत्या गौरवमप्यास्थीयत इति चेत् इहापि तद्विरहस्यासकृद्दावे
तितत्राकृतं पल्लवितेनेति ॥ ॥छ॥ ॥ व्यभिचारनिर्णयेन कारणत्वग्रहासंभवं निरस्यति चेति अनुमानयोरिति अनुमितेः कसाध्यविशिष्टे साध्यांतरानु
मित्यासहचारग्रहोपगमेपि नियमासंग्रहादिति भावः नियतव्यापारेति एकसंबंधज्ञानादीन संबंध्यंतरस्मरणादितः क्वचिद्विशिष्टज्ञाना तत्तावदप्यनियत
त्वेन न तस्य व्यापारत्वं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादित्यर्थः वस्तुतस्तु तत्तदुपनयव्यक्त्यादेस्तु गत्प्रमाव्याप्तिप्रतिकरणत्वेपि नक्ष
तिः प्रमावैजात्यस्यैवात्र प्रमाणांतरत्वनिमित्तत्वात् न चात्रापि प्रमावैजात्यमनुपलंभबाधितत्वान्मानाभावात् उपनयस्य विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्य
क्षे च संनिकर्षविषयोयप्रयोगितया जात्यावैस्थापकत्वात् अत एव बाह्याध्यक्षं तत्र प्रत्यभिज्ञा साक्षाद्घटाभावादिप्रत्यक्षाणांत तत्प्रतियोग्यादिविषयत्वे अन्यथा
जातित्वसंकरप्रसंगात् ज्ञानद्वयकल्पनेन च स्वैर्यमात्रमुच्छिद्येत व्यवस्थापितं च विशिष्टज्ञानस्य व्यवहारहेतुत्वं न च प्रमाणांतरासहकृतोपनयजन्यतावच्छेद
कतया वैजात्यसिद्धिः इतरासहकृतत्वेनाजनकत्वात् अस्ति धूमोपनयनात्मकसंनिकर्षवशेन मनसा प्रत्यक्षजनने स्थैर्योपगमात् पृथगितिनेर्वे वंधा
रान्वन्हिकोच्छेदः इतरमात्राविशेषणत्वेनोपस्थितेरेव नवत्वात् कोटिस्मरणस्य न व्याप्तिस्मरणादिना नाशात् विशेषदर्शनकाले च संशययोगाद्दहन
वेति न चैवमभावविशेषणत्वेनोपस्थितस्यापि प्रभावस्य ग्रहापत्तिरभावग्राहकसामग्र्या बलवत्या प्रतिबंधात् अभावविशेषणत्वेनोपस्थितिस्तत्रापि त्य

शिरोमणि

पिकंचित्तदृश्यादि रिवस्कतः वस्कतः यत्र क्वचिद् पिगृहीतस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादि साधारणी विशिष्टधीरियांस्तु विशेषो यत्कोटि
द्वयसहचरितधर्मदर्शनात् कोटिद्वयस्मरणे संशयो न्यथा त्वेककोटिनिश्चय इति एतेन धूमत्वादिना पक्षधर्मव्याप्तिमनुमाय वन्ह्याद्यनुमितिरिति परास्तं
धूमत्वत्वाद्यनुपस्थित्या धूमत्वादेर्वन्हिमत्त्वमत्त्वसूम व्याप्तिव्याप्यत्वायहेवन्ह्यनुमितिप्रसंगाच्च। अत एव यद्धर्मावच्छेदेन यद्वत्त्वगृहीतमुपनयवशात् तद्धर्म
विशिष्टस्य तद्वत्तास्ते धूमवत्त्वावच्छेदेन वन्हिमत्त्वग्रहाद्धूमवान् वन्हिमानिति बुद्धिः स्यात् न तु पर्वतो वन्हिमानित्यपि परास्तं प्रमाणाभावात् कल्पने दन्तत्वावच्छेदेन
गृहीतस्य सौरभादेः पुरोवर्तिनि चंदनत्वादिदर्शनादिदं सुरभीत्यादिबुद्धौ व्यभिचाराच्च यद्विवावच्छेदकधर्मवैशिष्ट्यमपि तत्र भासत इति नियमेपि प्र
माणिकस्तदा धूमवानयं पर्वतो वन्हिमानित्येव धीः स्यात् न हि लिंगोपाधानभाने बाधकमन्यत्साधकविरहात् हेतुसाध्येति संबंधिद्वयनिरूप्यपदार्थ
प्रत्यक्षप्रतिसंबंधिद्वयप्रत्यक्षस्य हेतुतायाः संयोगिस्थले त्वयैव क्लृप्तत्वात् तदनादरेपि साध्यघटितमूर्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्री
विना संभवादिति भावः विशेषणेत्यादि विशेषणविशेष्यसंबंधस्तद्देशप्रमात्वेलौ किंकत्वेवा विशेषदर्शनं च विपरीतज्ञानप्रतिबंधकतया क्व
चित्सहचरितधर्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्य च ज्ञानसत्वे प्यातिरित्तसन्निकर्षस्तद्देशत्वे किंकतायामुपयुज्यते एकैकत्वहीति वस्क
तो व्याप्तिसिद्धेपि न क्षतिः। सामान्यतो व्याप्तिसिद्धेपि न क्षतिः सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसंभवात् वन्हेरसंभिष्क
पदिति न न्यूपनयात्मकसंनिकर्षेणैव नयने निरूप्यतां कुतो ज्ञानोप वहिरिंद्रियमाद्द्रव्यस्याधेयतया तद्द्रव्यस्य वा ग्रहे तत्संयोगो हेतुः दंडीषु पुरुषो नास्ती

३२

त्वात् यह विषयधर्मिमात्रवृत्तिघटधर्मप्रकारकपक्षधर्मताज्ञानं हेतुरिति परास्तं सामान्यलक्षणानंगीकारे धूमत्वादेरपि तथात्वायोगात् वन्हिव्याप्यं सर्वप्रमे
यं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसंगाच्च व्याप्तिसामानाधिकरण्यत्वेन तादृशधर्मभाने कौ च साधुमव्यक्तिर्वन्हिव्याप्येति ज्ञानसहितादुक्तज्ञानात्तप्र
संगेश्च न्हिव्याप्यवानिति शाब्दज्ञानासंग्रहश्च अत एव व्याप्यत्वभानांशे प्रकारतया यस्तादृशो धर्मो भासते तत्प्रकारकपक्षधर्मताज्ञानं हेतुः वन्हिव्या
प्यवानित्यत्र च वन्हिव्याप्यत्वमेव तथा धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्यादिव्याप्तिभाने तस्यादिप्रकारत्वादिति परास्तं धूमसमानाधि
करणवन्हिव्याप्यं सर्वं प्रमेयं धूमवानमेयं प्रमेयत्वव्याप्यं सर्वमभिधेयं समानाधिकरणवाच्यायमित्यादिज्ञानादप्यनुमित्यापत्तेश्च न च धूमत्वादेः तिरिति
रितरे वृत्तित्वग्रहे स एव प्रतिबंधकः तदग्रहे त्वनुमिताविष्टापत्तिरिति वाच्यं एवंविधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचा
रग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात् किंच पुरुषांतरस्य तस्यैव वा कालांतरे वर्तमाने व्याप्तिग्रहमादायातिप्रसंगस्य संगाय स्वसमानका
लीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात् कारणतावच्छेदकस्य तत्तद्
तिमात्रपर्यवसायित्वे मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्वसंभवे धिकवैयर्थ्याच्च एतेन गृह्यमाणव्याप्यवच्छेदकताकेत्याद्युपदर्शितप्र
कारद्वयमपि प्रत्युक्तं वेदितव्यं। एवं धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपि निरस्तं तत्तद्धर्मविश्रांतमूर्तिकत्वेनाप्यननुगत
त्वाच्च यत्रेच्छातस्साधनताज्ञानस्येच्छाहेतुत्वेपि समानं इतिचेत् तत्त्वं प्रतिवक्ष्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुपस्थितौ लघुरूपावच्छेदेन कारणत्वं कल्प्य

श्यामीत्यादावन्यथाखकल्पनं सामान्यलक्षणानंगीकर्तृनयेनाप्रसिध्यवन्ह्यादिव्यक्तिकानुमितौ न प्रत्यक्षसंभावनापि संनिकर्षासंभवात् एतेन चाक्षिके
व्याख्यातं व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिः। न च साक्षात्कारिणी तत्रापि नयस्यासंभवात् एवं च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसंकर
प्रसंगादिति व्यापके चेत् तन्न सिद्धत्वादिना पक्षितेजलादिप्रतियोगिकत्वग्रहइत्य परमानाभावादिति तन्निष्ठाभावच्छेदकीतरयुहमतरणासंभवादित्
पि[?] यं उपसंहरति तस्मादिति वाशब्दोनाध्यायां उभयथापि प्रकृतासिद्धेः वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहि ज्ञानं न हेतुर्वादिनिगमनाविरहेणान्य
तरविशेषणविशेष्याभावस्यातंत्रत्वात् लाघवादिति अथ व्याप्यवृत्तिव्यापकत्वं सपक्षे[?]ऽभावस्य प्रतियोग्यसामानाधिकरण्यं वाच्यं तत्र स्वप्रतियो
ग्यनधिकरणवृत्तित्वं एवं चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशाघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिध्या च तदभाव
स्य स्वप्रतियोग्यतदधिकरणवृत्तित्वासंभवात् तथा च तद्व्यावृत्तये व्यापके हेतुसामानाधिकरण्यं वाच्यं न चैवं हेतौ व्यापकसामानाधिकरण्याप्रवेशाल्ला
घवाभाववेदस्तु तावदेवमापादतस्तथापि वृत्तिमत्त्वमात्रमुपादेयं न चैवं हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चयो वानुमित्यापत्तिरिति वाच्यं संश
ये दृष्टत्वात् व्यतिरेकनिश्चये च पक्षधर्मत्वग्रहे परामर्शविरहात् तदुक्तं हेत्वसाध्यसमानाधिकरण्यधर्मान्तरग्रहस्यैव तस्यापि विरोधित्वात् अन्यथा विषय
त्वात् पर्वतो वन्हिव्याप्यधूमवान्पाषाणमयश्चापाषाणमयावृत्तिश्च वन्हिरिति ज्ञानेन तद्वत्तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वन्हिर्धूमवदव्यापकोऽवृत्ति
श्चेति ज्ञानं न च साध्यप्रतियोगिकस्वसमानाधिकरणयावदत्यंताभावकत्वं साध्यप्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यंताभावकत्वं वा व्याप्तिः
साध्यप्रतियोगिकत्वं केवलान्वयि साध्यस्यान्योन्याभावे सर्वे धर्मविशेषावच्छिन्नात्यंताभावे वा प्रसिद्धमिति वाच्यं गौरवात् व्यापकत्वाद्यनंतर्भावेन यावत्त्वस्य

दुर्वचत्वात् गमाप्राभावेन स्वरूपसंबंधविशेषरूपत्वासंभवेनावच्छेदकस्यानतिरिक्तवृत्तित्वपर्यवसायित्वाच्च व्यापकतायां च प्रतियोगित्वादेः सामान्यभा
वस्याकर्तृत्वात् संबंधादिनिष्ठसाध्यप्रतियोगिकत्वव्यक्तेरभावस्य व्यभिचारिसाधनसामानाधिकरण्याद्यावदत्यंताभाववृत्तितया त्वयापि तस्यावश्यंवा
च्यत्वात् साधनसामानाधिकरण्यात्यंताभावप्रतियोगितानवच्छेदकधूमरूपव्यापकत्वाज्ञानमपेक्ष्य साध्यवदन्यावृत्तित्वज्ञानस्य लघुत्वात् तद्धेतु
तावादिनं निरस्यति अत एवेत्यादि विप्सासमभिहारवशादुद्देश्यधर्मवद्वृत्तेरत्यंताभावस्यान्योन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्मतद्
तिवा भासते न तु विधेयधर्मतद्वृत्त्यत्यंतान्योन्याभावानधिकरणत्वमुद्देश्यधर्मवृत्ति यद्धर्मिधेयं तत्त्वमेयमित्यादावसंभवादिति भावः साध्येतिअयो
गोभावप्रतियोगित्वे तथा च साध्यसाधनवन्निष्ठाभावप्रतियोगित्वव्यवच्छेदेनेत्यर्थः स्यादिति न स्याच्च केवलान्वय्यनुमानमिति द्रष्टव्यं न पक्षेति एतच्च
विरोधस्यातिस्फुटत्वमभिसंधाय साध्याभाववद्वृत्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदंति मानस एवेति प्रायिकत्वाभिप्रायेण तेन कचिच्छब्दा
दिनाकाक्षिकसाध्येंद्रियसन्निकर्षात् परामर्शेऽपि न क्षतिः पक्षसाध्यसंबंधस्याग्रहात् ग्रहेऽप्यनुमित्सायामनुमितिसंभवाद्व्यभिचारादिति न च यदुभय
वैशिष्ट्यावगाहि ज्ञानं कारणं तत्र तदेकतरोपसर्जनस्यान्यतरस्य जन्यज्ञाने प्राधान्येन भानमिति वाच्यं मानाभावात् अत्र चेदमस्वरसबीजं पक्षम
समानाधिकरणाभावप्रतियोगित्वेनाभावज्ञानं वन्ह्यादावव्याप्तिमसंदिग्धं भवितादृशाप्रतियोगित्वकावगाहिनाति प्रसक्तं पक्षधर्मधूमसमानाधिकर
णाभावप्रतियोगित्वेन च तज्ज्ञानमव्यापकं येन रूपेण पक्षधर्मता ग्रहस्तद्रूपावच्छिन्नव्यापकताज्ञानं च मीमांसकमात्रं निरस्तमिति

शिरोमणि

ध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासो सिद्धिसंकीर्णसंग्रहश्च विरोधोपि फलतः प्रतिरोध एव तदन्यत्वेन वा विरोधि
विशेषणीयं वक्ष्यति निरसिद्धांते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकं संबंधपदबलेन हेतुसंबंधितया विरो
धित्वे तात्पर्यं प्रवर्णनेन प्रायश्चोद्बाधादिवारणे घटत्वमनित्यं घटत्वादित्यादौ बाधादिवारणं प्रयत्नसाध्यमिव प्रतिभाति वस्तुतः अनु
मितिपदं तत्कारणज्ञानपरं आश्रयासिध्यादिवारणाय सत्यंतं तादृशापक्षकतादृशाहेतुग्रहाविरोध्यर्थकं अनयाचवावासिध्या व्या
प्यग्रहाविरोधित्वमेवाभिधित्सितं तेन वन्हिमान्वन्हिमाह्रदत्वादिहेतोः साध्यवद्वृत्तित्वादेर्नासंग्रहः विवेचयिष्यते चेदमुपरिष्टा

४८

त्सपक्षेतिसंपातायातं अत एवानुपदं विरुद्धोपीत्याद्यर्थेति विशेषणं पक्षवृत्तित्वं साध्याव्यापकत्वमिति हेत्वाभासत्वं हेतुवदाभासमान
त्वे वेत्यर्थश्च वृत्तिमत्त्वं एवं च साध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिरूपवत्त्वमर्थः साध्यतदभाववद्वृत्तित्वं साधारण्यं निश्चित
साध्यतदभाववद्व्यावृत्तत्वमसाधारण्यं तच्च व्याप्तिद्वयग्रहविरोधीतीदं यं असिद्धिविशेषस्तु वृत्तित्वं वृत्तिमत्त्वग्रहविरोधि साध्यतदभा
ववद्व्यावृत्तत्वमपि यदीदृशं तदाभिधिरेव नो चेदिदमेवासाधारण्यं साध्याप्रसिध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यं
व्यापकसामानाधिकरण्यमिह व्याप्यत्वं तेन द्वितीयस्यासिद्धेरितिरुक्तं तल्यैव केचित्तु असाधारण्यभावकालावछिन्नसाध्यतदभावव्याप्ति
शून्यत्वं विवक्षितं विशेषणाभावाद्युक्ततो व्याप्यस्य विरुद्धस्य वा साधारणस्य संग्रह इत्याहुः तच्चिंत्यं व्यर्थेति विरोधादेर्वारकं साध्याभा
वेत्यादिव्यर्थं तस्यपार्थक्ये प्रमाणाभावादिति भावः प्रथममित्यादि गमनीमित्यादि न दूषणं यथाश्रुते नापीत्यादि पक्षविपक्षत्वावछिन्न
व्यावृत्तत्वे व्यर्थेति सपक्षगतत्वविपक्षव्यावृत्तत्वयोर्दूषकतयामनुपयोगादिति भावः पक्षातिरिक्ते त्यादि व्याप्यविरुद्धयोरसाधारणयोः
संग्रहाय पक्षातिरिक्तपदे पक्षत्वं संदिग्धसाध्यधर्मत्वं धूमेत्यादिदूषणं यथाश्रुतेन तु सत्यमीसमासात् पक्षातिरिक्ते वर्तते यत्साध्य
वन्मात्रवृत्तिर्न तद्भिन्नत्वमित्यर्थ इति ध्येयं पक्षवृत्तीत्यादि विरोधः साध्यासामानाधिकरण्यं पक्षवृत्तित्वसाध्यसामानाधिकरण्य
ग्रहाविरोधीयानुमितेरोपयिकस्य जनकज्ञानविषयस्य संबंधस्य सपक्षसत्वादेरभावस्तद्वत्वमित्यर्थः सपक्षविपक्षव्यावृत्तत्व

स्यवासाधारण्यस्यनिश्चयेपक्षेसाध्यसमानाधिकरणसंदेहान्नतस्यतदज्ञानविरोधित्वंपक्षवृत्तौविरुद्धभिन्नेनवर्ततेयस्तादृशोभाव
स्तद्वत्वमर्थःइत्यपिकश्चित्पूर्वोक्तलक्षणानांयथोक्तरीत्यायथामतेनाव्याप्त्यादिसंभवनापरंतुतज्ज्ञानस्यानुमित्यप्रतिबंधकतयो
षांहेत्वाभासतावच्छेदकंनघटतेनघटतांवाकिंतेनतेषांहेत्वाभासविभागमात्रोपयोगित्वात् ॥ ६ ॥ इत्याशयवानाहउच्यतइतिसंदेहे
प्रत्येवसाधारण्यादिविशिष्टधर्मिज्ञानत्वेनहेतुतातज्जनककोटिकोटिद्वयोपस्थितंप्रतितुतादृशधर्मज्ञानत्वमात्रेणएणेत्य
भिप्रेत्याहउभयेतिसाध्यसंदेहजनकेतिप्रकृतेयथाकथंचित्कोटिद्वयोपस्थितिःसमृत्यनुभववसाधारणीसंदेहजननीनियमा
कंतुसाधारण्यादिविशिष्टधर्मवत्ताज्ञानंअतएवधाराबाहीसंदेहइतिमतेतद्धर्मितावच्छेदकविशिष्टेधर्मिणियद्रूपविशिष्ट
धर्मिज्ञानंसाध्यसंदेहजनकंतद्रूपवत्त्वमेववक्तव्यंकोटिद्वयसहचरितत्वादिज्ञानेनतस्याधत्वादिरूपत्वादिनाधर्मिज्ञानमे
वसंदेहजनकंनतुतदानींसाहचर्यज्ञानमप्यपेक्षतइतिनयेतुयद्रूपविशिष्टत्वेनगृहीतस्यधर्मस्यधर्मिवृत्तिताज्ञानंन
थातद्रूपत्वमेववाच्यंतच्चेत्यादिननुसाधारण्यंनसाध्यतदभाववद्व्यावृत्तत्वंवृत्तिमतस्तथात्वासंभवात्एककोटिव्याप्यस्यैव
ककोटिमद्व्यावृत्तस्यापिधर्मस्यबुध्येविशेषदर्शनतयासंशयविरोधित्वात्सत्प्रतिपक्षेपरामर्शप्रामाण्यसंशयोत्तरमे
वसाध्यसंशयात्तनापिनिश्चितसाध्यतदभाववद्व्यावृत्तत्वंतथियत्रसाध्यादिमत्तानिश्चयःतद्व्यावृत्तत्वेयनयेनरूपेण ५

ऽत्रयहदशायामतिप्रसंगात्ननवतादृशानिश्चयविषयस्यधर्मिणःवास्तवंसाध्यादिमत्त्वमपितत्रमानाभावात्किंसंदेहजनकतावच्छेदकऽ
यासाधारणेइदत्वेपिवस्तुतस्तद्व्यावृत्तत्वाभावेनतत्रलक्षणयोगादित्यस्तयोर्लक्ष्यत्वाभावेनपरिहरतिकेचलान्वयीतिअतः
यतएवपुरुषदोषाधीनंतद्दोषत्वमतएवतयानित्यदोषत्वंस्वाभाविकदोषत्वेकादाचित्कत्वानुपपत्तेःएवंचयत्रदोषताप्रयोजकं
वस्तुतोहेतोतत्रानित्यदोषत्वंयत्रतुपुरुषस्यतद्भ्रमोनतत्रतदपिभ्रममात्रादपिदुष्टत्वेअतिप्रसंगइत्याहअन्यथेतिकेचिद
परेतुअयंघटइएतद्घटत्वादित्यादावव्याप्तिसाध्यसंदेहप्रयोजकंहितस्यसाध्यतदभाववद्व्यावृत्तत्वंनचैकस्यधर्मस्यतदु
भयव्यावृत्तत्वंसंभवतिअसाधारण्यंतुतस्यपक्षमात्रवृत्तितयाअतस्तस्यालक्षणयोतरयतिअयंघटइत्यादिएवंगगनवृत्तिगग
नादिकमेवासाधारणपक्षवृत्तिताभ्रमदशायांवासाधारण्यस्यासंकरःनवाप्तियव्यावृत्तत्ववृत्तिमत्त्वयोःस्वरूपतोविरोधःनिश्चि
तसाध्यतदभाववद्व्यावृत्तत्वंचनसंदेहप्रयोजकंतथासतितन्मन्यायतयानिश्चितसाध्यतदभाववद्वृत्तित्वस्यापितथात्वेसभ्येतोसा
धारणत्वभ्रमविषयवृत्तिरूपस्यविशेषणत्वेव्यभिचारिणिरासभादौमहानसादिवृत्तितादशायामव्याप्तिःउपलक्षणत्वेसाधा
रण्यातीर्णदशायामतिव्याप्तिःअसाधारणप्रकरणसमयो[illegible]त्वेनभ्रमविषयोरनित्यदोषत्वंविशेषादर्शनदशायामनुमित्य
नुत्पादकप्रयोजकत्वंनतुवास्तवदोषहेतुत्वंअन्यथानुमित्यनुत्पादप्रयोजकज्ञानविषयतामात्रेणवास्तवहेतुदोषत्वेइत्याहुःअनवगतस

गित्वं तु तथा बाधप्रतिरोधौ तु धर्मिविशेषितत्वात् न तादृशौ सर्वसाध्याभाववत्तत् द्व्याप्यवत्वेत्यादिकमसाध्यवत्वग्रहविरोधित्वे
न सामानाधिकरण्यग्रहवि ।-रोधिना विपक्षवृत्तित्वादिना एवकारेणानुगमकरूपं व्यवच्छिद्यते तस्य हेत्वाभासतावच्छेदकत्वं तत्ता
सत्त्वावच्छेदकत्वं निरस्यति हेत्वाभासस्य लक्षणानुरोधेनेति तेनानुमितिविरोधित्वघटितलक्षणकरणे नासाधारणस्य
सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरन्यथा पुनरव्याप्तिरेव साध्याभावज्ञापकत्वेन साक्षात्साध्यवत्तानुमि
तिप्रतिबंधमित्यायसंप्रदायमनुरुध्येदं अत एव तावदग्रे तु भावियिष्यति नापीति निश्चिते साध्यवद्भिन्ने वर्तमानत्वमित्य
र्थः अनपसंहार्य इति साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्वादिति भावः नापीति इहस्य पक्षत्वेन निश्चयगर्भमतो नाभेदः घ
टइत्यादि इत्यस्य विरुद्धस्यानुपसंहार्यस्य प्रसिद्धस्य विरुद्धस्यांतरस्य व्यवच्छिद्यत्वात् अन्वयतो व्यतिरेकतश्च सहचारा
ग्रहदशायामीदृशं हि त्वमनुपसंहारीतिमतेनेदमित्यपि केचित् दिपक्षेति अत्र विपक्षत्वं साध्याभाववत्वं अनुपदमेव वक्त
गत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूलएव स्फुटतरमभिधानात् ननु निश्चयगर्भितज्ञानस्याप्रतिबंधकत्वात्
न ववक्तोयत्र तन्निश्चयं तद्वृत्तित्वज्ञानं प्रतिबंधकं रूपांतरेण साध्याभाववत्तानिश्चये हेतुज्ञाने प्रतिबंधात् न चैकेण रूपेण तत्तथा गौरवात्
प न

५९

हेतुसाध्याभावयोश्च सामानाधिकरण्यास्फुरणेन विरोधत्साध्याभाववद्वृत्तिर्हेतुरित्यादिज्ञानानाम् प्रतिबंधकत्वापाताच्च यत्तु सा
ध्याभाववत्वांशे निश्चयरूपं शेषांशे संशयः साधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबंधकं अन्यथा पक्ष एव साध्याभावसंदेहेन संदिग्धा
नैकांतिकत्वस्य स्पष्टत्वात् हेतुसाध्याभाववत्समानाधिकरणत्वावगाहितयैव ज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वात् अत एव पक्षसाध्याति
रिक्तधर्मातिरिक्तधर्मवान्मेयत्वादित्यादयोनुकूलतर्कविरहिणो बाधप्रतिरोधयोरन्यतरेपि पक्षएवसंदिग्धानैकांतिकतय
प्रयोजकागीयंते एवं वह्निदोहानुकूलेत्याहादयः शक्तिसाध्यका अपि अनन्यथापक्षातिरिक्ते सर्वत्र साध्यवत्तानिश्चयो
व्याप्तिग्रहस्य दुर्वारत्वादिति पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसंगाच्च अथ साध्यतद्वदत्यंताभावान्योन्याभावग
र्तव्यभिचारयोरेकोपादे इतरो व्याप्तिः साध्यवत्ताज्ञानप्रतिज्ञानप्रतिबंधकज्ञानविषयत्वेनाभावद्वयानुगमनेपि हेतुमतिता
दृशाभाववत्वस्य तादृशाभाववति हेतुमत्वस्य तादृशाभावे हेतुसामानाधिकरण्यस्य साध्यतद्वदादौ हेतुसामानाधिकरणता
दिज्ञाभावप्रतियोगित्वादेश्च संग्रह इति चेत् । अत्र वदंति प्रकृतसाध्यसामानाधिकरण्यग्रहाविरोधिनो ज्ञानस्य विषयतया
न्वयव्याप्तिग्रहविरोधितावच्छेदकत्वेन विसजना न संग्रहः अविरोधिन इत्यंतेन साध्याप्रसिद्ध्यादीनां निरासः । यदि पुनरत्यंता

×न्योन्याभावत्वयोरेकतरगर्भव्यभिचारज्ञानस्यनान्यतरगर्भव्याप्तिग्रहविरोधित्वमित्यादिकंविभाव्यतेतदासाध्यसाधनाधिकरण्यघटितत्वेनान्व ×२
थव्यतत्वयोनुगमनीयाप्रातिस्विकरूपेणोपादायवातावद्व्याप्त्यवगाहित्वंग्रहस्यवक्तव्यंसाध्याव्यभिचरितसामानाधिकरण्यस्यव्याप्त्या
प्रसिद्धहेतौविरहोप्यतद्विशेषएवविशिष्टसाध्यसाधनवत्वग्रहाविरोधिनोज्ञानस्यविषयतयाव्याप्यकत्वंग्रहविरोधिकत्वंवाविभाजकंस
षपूर्ववत्साध्यतद्वदत्यंतान्योन्याभावोसाध्याभावव्याप्त्यादिव्यावृत्तेनसाध्यवत्ताज्ञानविरोधित्वेनाननुगमय्यतत्रहेतुसामानाधिकरण्य
साभावग्रहविरोधित्वंसाध्यवत्ताज्ञानविरोधिनिवातादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्वंवातथाचलक्ष्यंसाध्याभावव्या
त्यादौतुहेतुसामानाधिकरण्यादिकमभिरोधित्वान्नाभासविरोधित्वंपूर्वोक्तदिशावसेयंउपदर्शितविशिष्टव्याप्तिविरहोव्याप्यत्वासिद्धि
वृत्तिव्याप्तिग्रहकारणसहचारग्रहसहकार्यभावप्रतियोगिताज्ञानविषयत्वेनानुगमय्यत्यपिकेचित्प्राचामतेनोत्तरयंतिनसर्वेत्यादि
सर्वेपिविपक्षेष्वर्थेपितेनसाध्याभाववन्यूनवृत्तेर्व्युदासः विपक्षत्वस्यनिश्चयगर्भत्वात्तत्रवनित्यागंधवत्वात्नित्यः चाक्षुः शब्दत्वादित्या
दौनाव्याप्तिः पृथिवीरूपवतीरसादित्यादौजलादौरसत्वादिभ्रमेपुनरसाधारण्यभ्रमएवेतिमंतव्यंतथापीतिपक्षत्वेसंदिग्धसाध्य
कत्वंमतंदूषयति अथेत्यादिव्याप्त्यात्यादितथाचस्वतोदूषणाक्षमत्वाभासत्वमुपाधिविदितिभावः एकधर्मिव्यावृत्तत्वेनसामान
धिकरण्यग्रहविरोधिधर्मतरेतुतीसत्वात्अन्यसतोरपिसाध्यसाधनयोर्व्यतिरेकित्वंदोषायस्यात्तथायंतु किंतुरभिप्रायःपक्षेसाध्य
भावस्यसंशयेनिश्चयेवानुमितिविरोधिविरोधिविषयत्वात्तत्सामग्रीतविरोधिसामग्रीत्वेनतत्रादिमस्यसामग्रीपक्षसव्यभिचारस्यहेतास्य

५२

यत्रयत्रतत्वंनिश्चयस्तेनतेनरूपेणतद्व्यावृत्तत्वं अन्वयाआद्येसर्वाणिसाध्यव्याप्यवंतिसाध्यवंतिसर्वाणिवासाध्यवंतिप्रमेयाणीत्यादि
निश्चयेसामान्यतः पक्षेपिसाध्यादिनिश्चयादतथात्वप्रसंगः द्वितीयेतुविशिष्यपक्षेसाध्यनिश्चयंविनैवशब्दादिनासाध्यव्याप्य
त्वनिश्चयेपितत्वापातः नैषदोषः यादृशव्याप्तिग्रहेसतिनासाधारणंतद्ग्रहाभावेनविशेषलक्षणस्यसाधारण्याभावविशिष्ट
स्यतद्ग्रहस्यवाभावेनसामान्यलक्षणस्यविशेषणादितिव्याप्तिनिरासात् विशिष्टाभावादेवचसाधारणेव्याप्तिभ्रमदशायां
नाव्याप्तिरितिचेदेवंसतिएकेनव्याप्तौगृहीतायांसाधारणस्यनकिंचिदपिप्रतिसव्यभिचारित्वंस्यात्स्याद्वातदपितत्सुरुषघ
टितसाधारण्यवत्साध्यादिव्याप्यवत्वेनरूपेणसाध्यादिमत्वनिश्चयेव्याप्तिप्रसंगाद्वह्निघटोनिघटाद्यावृत्तंशब्दत्वमितिवदमि
त्यतव्याप्यवतोव्यावृत्तत्वंशब्दत्वमितितदानींनिश्चयः अभिहितंचनिश्चितसाध्यतदभावव्यावृत्तत्वेनसंशयप्रयोजकमिति
किंतुसाध्यतदभावाभ्यांसहचरितत्वमिवतत्सहचरिताभावप्रतियोगित्वंव्याप्यविरुद्धयोस्तत्वेननिश्चितयोर्दर्शनेविशे
षदर्शनवृत्ताद्वेनसंशयस्यइतिविभाव्यलक्षणांतरमाह विरुद्धान्येतिविशिष्टसाध्येहेतुसामानाधिकरण्यग्रहाविरोधित्व
त्मकमर्थतोविरोधिविशेषणंतेनसाधनयोरप्रसिद्धयोरवृत्तित्वस्यपरस्परासामान्याधिकरण्याधीनांचनिरासःपक्षपदंचधर्मि
मात्रपरंतथाचयद्धर्मवृत्तित्वेहेतोर्ज्ञायतेतत्रतत्रैवानुमितिविरोधियद्रूपंतद्वत्वमित्यर्थः साध्यव्यापकीभूताभावप्रतियो

हृत्वाभावस्याग्रहीतुमशक्यं व्यापकत्वाभिमतत्वाद्यत्वाभावाभाववत्त्वस्य वृत्तित्वस्य नित्यत्वानित्यत्वयोः संदिग्धमनस्त्वादिति वा
च्यं तथात्वेपि तादृशसंशयाभावदशायां तथा तन्निश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्वस्य शब्दप्रतिसंधानादृशाक्य
त्वात् आश्रयभ्रमप्रतीत्यैवाप्रतीतस्य सौरभादेरभावस्य प्रानीय पाषाणादौ पृथिवीत्वात् तदभावसहचारेण तदुभयव्यापकताग्र
हितादृशाभावप्रतियोगिसौरभत्वस्य चंदनादौ परामर्शे पृथिवीत्वादौ साध्यतदसाधारण्यस्यातिप्रसक्तत्वाबीत्तेनन्वयं सत्प्रति
पक्ष एव व्याप्तेरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वादत आह सत्प्रतिपक्ष इति नन्वेवंविधस्थले न पृथगभिधानेति प्रस
गः स्वतंत्रेच्छाया इत्यादेः ग्रंथकृतैवाभिधानात् तदभावसाधके तत्साधके तद्भ्रमपात्राक्लिप्ति विशेषसूत्रनार्यत्वान सव्यभिचारसत्प्रति
पक्षोभयलक्षणाक्रांततयोभयोस्तद्भावस्य विरुद्धत्वादित्यपि कश्चित् सर्वसपक्षेति सपक्षः साध्यवान्पक्षवृत्तित्वे सति साध्यव्याप
कीभूताभावप्रतियोगित्वमित्यर्थः इदं च साक्षादनुमितिविरोधिविरोधस्य साध्यासामानाधिकरण्यादिरूपान्वयव्याप्तिग्रहविरो
धीति न सांकर्यशंकापि साध्यसामानाधिकरण्यं तु साधारणं दशा विशेषतद्भ्रमस्तु पुरुषदोषो व्याप्य इव साधारण्यभ्रमः न
वीनाः पुनरेवं वर्णयंति सामग्रीद्वयविरोधेन हेतुभावस्य साध्यतदभावव्यापकताग्रहविरोधो साधारणस्य दूषकताबीजं तथा
हि त्वभिमताहेतुना क्वचिदपि वर्तितव्यं तत्र वावश्यं साध्यतदभावयोरन्यतरेणाभवितव्यं न च तत्र हेतुभावः संभवति भवतोरुभयमन्य

५२

तराव्यापकत्वं तस्य एवं विरोधध्रौव्ये साध्येन तदभावेन च हेतुभावस्य सहचारज्ञानं नैकतरनिरूपितामपि व्यापकतां ग्राहयति
मिथो विरोधात् विरोधिपरामर्शद्वयमिव साध्यतदभावो एवं च वृत्तिमत्त्वविशेषितं हेतोर्यावत्सपक्षविपक्षव्यावृत्तत्वं वृत्तिमत्प्रति
योगिकत्वविशेषितं वा हेतुभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति योजयंति च ग्रंथमित्थं शब्दत्वं यदि साध्यतदभा
वद्भ्यां व्यावृत्तत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञानं ज्ञानयोग्यं स्यात् तद्वत्स्यादिति यावर्त्त तदाव्यतिरेकितया ता
दृशव्यतिरेकप्रतियोगित्वेनार्थात्पक्षे तदुभयसाधयेत् तदुभयसहचरितं भवेत् व्यापकाभाववति व्यावृत्ताभावस्याभावात् अतथा
भावे वा पक्षधर्मता या व्याप्तेः वानुपपत्तिः न च तथाभावः संभवति न वा पक्षवृत्तित्वं बाधितः अतः साध्यतदभावोव्यापकतया
तदुभयसिद्धिअनुकूलविरोधिव्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतयाऽसाधारणो दोषो व्याप्तिग्रहः प्रति
बंधकः ननु यदि विरोधिव्याप्तिद्वयं हेतुसमुत्थत्वात् तस्येत्यत आह सत्प्रतिपक्ष इति तत्र हेतोर्भिन्नतयाधिकरणसिद्धेर्न त
थाग्रहः संभवति अत्र पुनरेकस्मिन्हेतौ तदुभयग्रहो विरुद्ध इत्यत्र इति अत्रेदं चिंत्यं एवं सति पक्षादेर्यवत्वे विशेषणं व्यर्थं दूषक
तायामनुपयोगित्वात् व्यभिचारग्रहमात्रोपक्षीणत्वात् वृत्तिमत्त्वादिविशेषितस्यापि वासाधारण्यस्य ज्ञानं व्याप्तिज्ञानविरोधि
विरोधिविषयत्वाभावात् उपदर्शितविरोधितच्छरीरेन च भावाव्यापकतयोरपि न स्वतो विरोधो दर्शितरीत्या तदवधारणे चावश्य

श्रीरामः

कव्यभिचारज्ञानमेव प्रतिबंधकं अत एव सत्यप्यसाधारण्यज्ञाने एकत्रानुकूलतर्कावतारे भवति व्याप्तिधीरिति एतेन तादृशसहचारज्ञानं तु क्व
बलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबंधकं तर्कावतारे तु तत्र बलत्वेन नास्तीति परास्तं तर्कस्य व्यभिचारशंकानिवर्तकत्वेनैवोपयो
गित्वात् सामग्रीत्वेन प्रतिबंधकत्वे हेत्वाभासत्वायोगाच्च सत्प्रतिपक्षे च विरोधिव्याप्यवत्ताज्ञानं निर्णयत्वेन प्रतिबंधकं न तु विरोधिसा
मग्रीत्वेन बाधावतारे त्वापातत: प्रतिपक्षितत्वेपि बाधेन प्रतिहतत्वोप्याख्यत्वाद्दिनान एव साध्यानुमित्युदयादिकं तत्फलं विवेतीति ॥ ॥ नै
केवलान्वयीत्यादि सद्धेतुत्वे साधारणत्वेन केवलान्वयिन: साधारण्यस्य व्यतिरेकिणस्तु साधारणत्वे भागासिद्धत्वे विरुद्धत्वं स्य
थासंभवं बोध्यं नापीति केवलान्वयिसाध्यकेपि बाधकमानप्रसिद्धिरुक्ते वेद्धीति वा हृदयं अव्यापकत्वादिक्षति न सत्यं तवेत्यर्थं
निश्चितसाध्याभाववद्वृत्तिमात्रवृत्तित्वे साधारण्यविरुद्ध इति साधारण्याद्यग्रहदशायामस्यासांकर्यमिति वा हृदयं अव्यापकत्वादि
ति असद्धेतुत्वं च व्याप्तिनिश्चयदशायामेवेति भाव: अथेत्यादि पक्षातिरिक्ते न प्रतीतानिश्चिता व्याप्तिग्रहानुकूला न्वया व्यति
रेकेण वा सहचारस्य सतथा सद्धेतोरेवेति तथा च लक्षणपक्षातिरिक्तपदे सहचारग्रहस्थलमात्रोपदर्शनं न विशेषकमिति
भाव: विशेषकत्वाभिप्रायेण दूषणद्वयमाह तत्रैवेत्यादि असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोभिधेय: शब्दत्वा
दित्यादौ जन्यमि: स्नेहेंशी तस्यश्चविवादित्यादौ च रूपं जलत्वाद्व्यभिन्नं गुणवत्वाद्गुणकर्मान्यत्वे सति जातिमत्त्वाद्वा [illegible] त्वाद् इत्यादौ च रूपं

५४

हो द्वितीयस्य तु पक्षे हेतो: परामर्शोत्तरं तयोराभासत्वं अत एव सव्यभिचारलक्षणे पक्षे वृत्तित्वे विशेषणं साध्याभाववद्वृत्तिमत्त्वमात्रं पुनरसिद्धि
रव विरोधान्यस्य परामर्शविरोधिनो रूपस्यतत्वादिति मैत्रं बाधसंशयस्य प्रतिबंधकत्वानंगीकारात् साधारणधर्मवत्ताज्ञानस्य संश
यसामग्रीत्वाभावात् सामग्रीत्वेन प्रतिबंधकत्वे हेत्वाभासत्वायोगाच्च अन्यथा पक्षस्य साध्यतदभाववद्वृत्तिप्रमेयत्वादिमत्त्वे
सर्वत्र हेत्वाभासापत्ते: तथा कामिनी जिज्ञासादिप्रयोजकं तज्ज्ञाने ष्टसाधनत्वादिकमपि एवं विशिष्टस्यतु द्भाव्यत्वं बुसाध्य
केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किं चेति वाद्युपदर्शितदृष्टांतस्य साधनवैकल्या तदुभावने तु साधारण्या
भावनं सपक्षांतरगामित्वसत्वेपि तत्संभवात् उद्भावनं तु तस्य निग्रहस्थानत्वात् विभाजकसूत्रस्थानुक्तसमुच्चायकेन चकारेण
तस्यापि समुच्चितत्वात् उदाहरणाभासतोपदर्शनायैव वा आवश्यकश्च प्राचां दृष्टांतप्रयोग इति भाव: मा भूत्यदार्थनुमाने
साधारण्यं दोष: स्वार्थे तु स्यादत आह स्वार्थेति स्वमते सिद्धांतमुपक्रमते इष्यत इति अर्थादिति व्यतिरेकिमूर्द्दियार्थदुक्तं यं सा
धयेत् अर्थवशात् संपन्नमेवो सयसिध्यनुकूलव्याप्त्यादि ग्रहादित्यर्थ: व्यतिरेकित यावेति पाठे यादृशार्थापत्तिविधयेति परमतेन
एवं च पक्षधर्मतया ज्ञायमानो हेतु: साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियो
गित्वज्ञानाच्च साध्याभावस्य साधनायान्मुखौ मिथो विरोधिनौ नैकमपि साधयतीति न च शब्दे नित्यत्वानित्यत्वसंदेहे तदुभयव्यापकत्वेच

पदार्थस्थलेबहिर्भावंव्याप्यादयतिएवमित्यादिनाअप्रसिद्धिरनिश्चयःज्ञानेज्ञापनेस्वार्थस्थलेतंभावंएतेनेत्यादिनाशंक्यनिरस्यतिउपजीव्यत्वादिति
अत्रेदंचिंत्यं।हेतुमतिसाध्याभावसंदेहोनाभासःसत्त्वेयेवविरोधात्तद्विषयस्तुहेतोःसाध्याभावसामानाधिकरण्यंसाध्यस्यवाहेतुमन्नि
ष्ठाभावप्रतियोगित्वेनास्त्येवकेवलान्वयिसाध्यकेव्यतिरेकिसाध्यहेतुसाधारण्यरूपतयसंदिग्धानैकांतिकत्वपर्यवसितंकिंच्चविषय
कसाध्यतदभावसंदेहेवकारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात्संशयसामग्र्याःसाध्यतदभाववत्वनिश्चयप्रतिबंधाद्वाव्याप्ति
ग्रहेऽज्ञानरूपाप्रसिद्धिरेवउपजीव्येपिवंसाध्याभावसंदेहादिनाभासःसत्त्वेयेवविरोधित्वादितियत्तुव्याप्तीतिव्याप्तिग्रहानुकूलसह
चारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमर्थःविरोधस्तुसंशयसाधारणमन्वयमात्रसहचारग्रहेविरुद्धेअसाधारणेव्यतिरेकिणि
चनव्यतिरेकग्रहसहचारप्रतिरोधःतादृशरूपमंतरेणलक्षणस्यासंभवितयात्तद्वरूपलक्षणमाहकेवलेति।तादृशावच्छिन्न
पक्षःपक्षसंदिग्धसाध्यकोयस्याश्रयःसतथातथाचकेवलान्वयिधर्मावच्छिन्नसाध्यसंदेहविषयवृत्तित्वमनुपसंहारित्वंव्यति
रेक्यादौतुकेवलान्वयीनसंदेहविषयतावच्छेदकःसाध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वंवातत्वेधर्मविशेषनि
यंत्रितंस्तुसंदेहोनान्यधर्मिकनिश्चयविरोधीसाध्यसंदेहविषयताव्याप्त्यसाध्यसिध्यनुकूलव्याप्तिग्रहोपयिकसत्ताकत्वंवाता
दृशीचसत्तान्वयेहेतोव्यतिरेकेचतदभावस्येतिनकश्चिद्दोषःस्वरूपसत्तादृशासंशयविषयेहेतुमत्ताविज्ञानंहेतौसाध्यसामानाधिकरण्यसंशय

सामग्रीत्वेनतन्निश्चयप्रतिबंधकंसर्वत्रसंशयसामग्र्याःनिश्चयप्रतिबंधकत्वस्यकल्पनात्हेतुमतिसर्वत्रसाध्याभावसंशयेहेतौसाध्य
सामानाधिकरण्याभावसंशयस्यौचित्यावर्जितत्वात्साध्याभावेनसाध्यसामानाधिकरण्याभावोपस्थापनादितितत्रसर्वत्रसाध्यसं
देहदशायांक्वचिदपिसाध्यसामानाधिकरण्यस्याग्रहीततवेनतदभावस्यग्रहीतमशक्यत्वात्प्रतियोगितावच्छेदकविशिष्टप्रतियो
गिनिश्चयस्याभावधीहेतुतयाःअसकृदावेदितत्वात्अस्तुवायथाकथंचित्साध्यहेतुसामानाधिकरण्याभावसंशयहेतुत्वेनवा
तथात्वेनतथापिसामग्रीत्वेनप्रतिबंधकयाहेत्वाभासत्वंअन्यथाव्यभिचारितांव्यभिचरितसामामानाधिकरण्यासमानाधिकर
णव्याप्यपक्षधर्मतापक्षधर्मादिसाधनवन्निःसाधनादिसाधारणद्रव्यत्वादिमत्वेहेतोःपक्षस्याभासांतरस्यात्त्वदुपद
र्शितस्येवतथापित्तानस्येतरसाधिरोनतन्निश्चयविरोधिसंशयसामग्रीत्वात्एवमप्रसिद्ध्यादिनिश्चयकप्रत्यक्षसामग्र्योपिअ
पिवहेतोःसाध्याभावसंदेहविषयमात्रवृत्तित्वेदूषणमितिप्राप्तंतत्रव्यतिरेकिणिहेतोनितविषयेणापिसंदेहेनसंपद्यतेदूषक
ताबीजसत्वेनासाधारण्यादिसाधारण्येनदोषायेनशास्त्रेचनिर्भरःकर्तव्योहेत्वाभासत्वानुपपत्तेरित्युक्तत्वादितिकृतंपल्लविते
नेति॥ ॥छ॥ ॥व्याप्तिग्रहप्रतिबंधकलक्षणेकप्रयोजनंनचव्यतिरेकव्याप्तिग्रहस्यप्रतिरोधात्तल्लक्षणेतुविशिष्टसाध्यसाधनग्र
हाविरोधिनोज्ञानस्यविषयतयाव्याप्तिग्रहविरोधितावच्छेदकरूपंव्याप्त्यीश्चान्वयतोव्यतिरेकतस्थानानारूपाप्रातिस्विकरूपेणोपादायताव

द्वगाहीयहेत्वाभ्यः साध्यसाधनयोरप्रसिद्धेरसिद्धिभेदस्यव्यतिरेकात्लक्षणंतु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रह
विरोधितावच्छेदकरूपं व्याप्तिश्चान्ववारणायाविरोधिन इत्यंतं साध्यसाधनभेदेन सव्यभिचारभेदाद्वृत्त्रविशिष्टसाध्यसाधनं प्रवाप्रसि
द्धं तत्र तद्ग्रहाविरोधिनोपादेयं एवमन्यत्रापि विशेषहेत्वाभासलक्षणेषु तद्दिशावसेयं व्यर्थविशेषणत्वं तु न व्याप्तिग्रहविरोधीति वस्य
तिसाध्याव्यभिचरितसामानाधिकरण्यविरहस्य बहिर्भावनीयत्वे पुनरन्वयव्याप्तौ व्यापकत्वं अव्यभिचारितत्वं वा सामानाधिकरण्यं च
विशकवलितं युगपदुपादेयं तत्र साधारणत्वं वर्णितं असाधारणत्वं तु सपक्षव्यावृत्तत्वं सपक्षश्च साध्यवान् तद्व्यावृत्तत्वं तद्वृत्तित्वग्रहवि
रोधित्वं प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकत्वमिति विशिष्टवि
संगृह्यते तेनेत्यं साध्यादेः साधनवदवृत्तित्वादिकं चाक्षुषस्य शब्दवान्स्याच्छब्दत्वादित्यादौ विशेष्ययोरसामानाधिकरण्यं च बाधासि
द्धिभेदस्य च साध्यसाधनयोरवृत्तित्वस्यैतत्सांकर्यमपि न क्षतिः इदमेव च मणिकृता विरुद्धत्वं इत्थं च तदीयमसाधारणत्वमुक्तं विरुद्ध
त्वमिति यत्र च धर्मिणि यो धर्मो यादृशो हेत्वाभासः तत्र स तद्व्याप्यमपि तद्विशेषांतरेण प्रकरणसमं तद्व्याप्यं च पृथगुपदेशादविरोधित्वाच्च
अनुपसंहारित्वं च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकत्वं च तादृशं साध्या
दिरत्यंताभावप्रतियोगित्वादिकं च वह्न्यभावाभाववत्वेन वह्नौ धूमाभाववद्वृत्तित्वज्ञानं च वह्न्यभावव्याप्यधूमाभावव्यापकताज्ञानं च दादिरुध्यादपि न तु वह्नित्वेनेति नातिप्रसं

जलत्वाद्द्रव्यभिन्नं गुणवत्वाद्गुणकर्मान्यत्वे सति जातिमत्वाद्वाद् इत्यादौ विरुद्धे नातिव्याप्तिरित्यर्थः। दूषकतायामिति सहचारभावस्यैव ज्ञानविरो
धिनस्तु तत्र सत्वे योऽस्यापीत्यर्थः। अर्थं गत्येति। अनैकांतिकत्वाद्यर्थविवेचने प्रातिस्विकरूपेण च प्रतिबंधकत्वव्यवस्थितेरित्यर्थः। के
चित्तु दूषकतायामसाधकतासाधकतायामर्थेति अनेकांतिकत्वाद्यर्थे उभयकोटिपुरस्कारकत्वादेशस्य व्यर्थत्वादित्यर्थ इत्याहुः।
विप्रतिपत्तिपक्षे साध्याभाववत्वप्रतीतिः साध्ये पक्षनिष्ठाभावत्वप्रतीतिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्वा औ
पाधिके केवलान्वयीति साध्याभावाप्रसिद्ध्याव्याप्तेरित्यर्थः उभयत्र सर्वस्येति अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वे तत्तद्व्याप्यवृत्तिक
त्वं तदितरावृत्तिकत्वं वा। अद्यकेवलेति इदं च कथंचिद्व्याप्तिग्रहदशायां द्वितीये सर्वस्येति व्याप्तीत्यादि यत्र व्यस्येत्यर्थः। तथा च हेत्वभि
मतशब्दोपसंदानात् हेतुकप्रकृतसाध्यसिद्धोपयिकव्याप्तिग्रहानुकूलोपसंहाराभावस्तस्यानुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकि
णि नाव्याप्तिः नन्वनुपसंहारः सहचारः तन्निश्चयो वा आद्ये तादृशस्याभावः निखिलप्रसिद्धानुपसंहार्यो व्यापकः व्यापकश्च रूपं द्रव्यभिन्नं गु
णवत्वादित्यादेः द्वितीये पुनरज्ञानरूपासिद्धिपर्यवसायी कारणाभावस्तयास्वरूपसच्च दोषो न हेत्वाभास इत्यत आह केवलान्वयीति
पक्षः साध्यनिश्चयविरोधिनः साध्यवात्रवेत्यादेः संदेहस्य विषयः अवच्छेदकत्वेन स्वन्यूनवृत्तितत्कत्वं तत्र स्वरूपसतोऽप्यविरुद्धांते
न प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसंदेहदशायां नाव्याप्तिः एवं च सर्वत्रैव हेत्वादिमति साध्यकतदभावसंदेहमद्व्याप्यग्रहेणाभासत्व

केनतु विशेष्यकं दूषकतायामनुयोगितावद्व्याप्तिकरत्वाद्वृत्तिविशेषसूत्रनायवात्त्वतेन समवायेन हेतुतायां धूमेनाव्याप्तिः अद्ययोः सा
ध्यवदवृत्तित्वतदधिकरणत्वाभावोचरमयोश्च साध्यवद्वृत्तित्वाधिकरणभेदावथाविति भेदः ज्ञानातिप्रसक्तिं नचेत्यादिना निरस्यति तेनेत्या
दि साध्याभाववद्गामित्वज्ञानेन विनावृत्तिमत्वविशिष्टसाध्यवदवृत्तित्वज्ञानापर्यवसानादित्यर्थः। असहचारेति सहचारः सामानाधिकरण्यं
व्यभिचारेति व्यभिचारो न ज्ञायते तस्मात्तद्व्यभिचारज्ञानं तदयमर्थः अव्यभिचरितसामानाधिकरण्यरूपाया व्याप्तेर्व्यभिचारांशग्रहवि
रोधिग्रहविषयतया यथा व्यभिचारो हेत्वाभासस्तथा सामानाधिकरण्यांशग्रहविरोधिग्रहविषयतया विरोधोपीति सचायं विरुद्धोद
तुः साध्याभावेति तदभावत्वं तद्वृत्तात्वग्रहविरोध्यभावत्वं तेन साध्यवदन्यत्वे व्याप्यत्वोपसंग्रहः। एवमुत्तरत्रापि साध्यव्यापकेति व्याप्यप
दं स्वरूपपरं साध्येति साध्यव्यापकसामानाधिकरण्यग्रहविरोधिरूपवत्वादित्यर्थः। तेन साध्यव्यापकवदवृत्तित्वाद्युपसंग्रहः। सर्वत्र
वोपलक्षपदं स्वरूपसिद्धिमात्रफलकं साध्याभावेति व्याप्यपदव्युत्यासेन साध्याभावव्याप्यत्वेन साध्यव्यापकाभावे [illegible] स्वसमानेति।
तयान्न साध्याभावसाध्यव्यापकभावयोर्निरुक्तसाध्यव्यापकाभावत्वेनानुगमनान्नाधिक्यमित्यर्थः। प्रतियोग्युपलम्भात्स्वरूपतः साध्यवत्
ग्रहविरोधित्वात् तेन निरग्निकादन्यत्वादिसंग्रहः साध्यव्यापकेति अत्र व्यापकत्वं भेदाभेदसाधारणं तेन साध्याभावव्याप्यत्वपरिग्रहः धू
मवत्वादित्यर्थः इति। धूमाभावस्य वह्न्यभावव्यापकताग्रहदशायामस्य मेध्यमंतभावः। वह्न्यभावव्यापकवह्निसामग्र्यभावव्याप्यत्वग्रहे
चरमे इदं पुनरवधेयं केचित्तद्रूपिणि किं स्वरूपतो ज्ञातान्येव सामानाधिकरण्यग्रहविरोधीनि असामानाधिकरण्यव्याप्यत्वेन वा नाद्यः व्या

पकाभावव्याप्यत्वादेस्तदसंभवात् न द्वितीयः साध्याभावत्वसाध्याभावव्याप्यत्वयोः स्वरूपेणैव ज्ञानयोस्तथात्वात् तथात्वेपि
तत्वमविरुद्धमिति चेत् [illegible] तेवमसामानाधिकरण्यस्य सामानाधिकरणावृत्तितत्तद्धर्माणां वतथात्वादापिक्यं नचैतानि धर्मा विशि
ष्टकान्यत्र सर्वेषामेव साध्याभावव्याप्यत्वेनैकविधत्वादिति विरोधोन्नायकप्रकारत्रैविध्येन धर्मिणोपि त्रैविध्याभिधानमित्यपि वदंति अ
यंचेत्यादिबाधस्वरूपासिद्ध्यान्यतरसंकर आवश्यकोन्यसंकरस्तु क्वाचित्कः ज्ञानासंकरात्तु पार्थक्यं एकत्रेति व्याप्यत्वपक्षधर्मतायाः पक्ष
धर्मेण व्याप्यत्वस्यारूपः प्रत्येकमव्यापकतो विशिष्टस्यारोपो वाच्यः सर्वैकधर्मिणि विरोधिव्याप्यद्वयविरहाद्विशिष्टस्याप्रसिद्धानसंभ
वतीत्यर्थः। विरुद्धादौ साधनेस्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेरस्त्वेत्यपि द्रष्टव्यम्॥ एकत्रैव भगेति तथा चान्यतरत्वे
न तद्व्याप्यमस्तीति सत्प्रतिपक्षितव्यवहारो हि सत्यसत्यवासाधनेनाप्रमीयमाने नाप्यविध्यमाने
विरोधिपरामर्शे तु एव सत्प्रतिपक्षो विरोधिव्याप्त्यादिमत्तया परामृश्यमाणे हेतुः विरोधिपरामर्शो वा यस्य परामृश्यमाणस्य हेतोरसौ
सत्प्रतिपक्ष इति विग्रहमपि वर्णयंति ततस्तदनुसारेण व्यवहारोपयिकं लक्षणमाह साध्येति बाध्याभिप्रेत्यान्निर्णायकवारणाय सम
र्थौ तन्नवासौ न व्याप्तिपक्षधर्मतात्मकबलेनोपस्थितौ इति वाच्यं व्याप्तिपक्षधर्मताविरहस्य साध्यत्वपक्षतावच्छेदकत्वे वा संभवा
त्पक्षसाध्याभावव्याप्यवान्साध्यपक्षवृत्तित्वाभावव्याप्यवानिति पक्षस्य व्यापकस्य च भेदेन सेदान्वयव्यतिरेकभेदेन च व्याप्तेरभिन्न

त्वादेकोपादानेन्यासंग्रहेण बलस्याविवक्षिततत्वान्न साध्यविरोध्यनुमितिजनकज्ञानविषयत्वेन तदुपादाने तदुपस्थित्याभिधानं न
शिरोवेष्टनेन नासिकास्पर्शमनुधावति साध्यस्य साध्याभिप्रेविरोधिन्याहपक्षेन साध्याभावभित्यादुपस्थितेः साध्यविरोधिसाधनव
त्वाज्ञानप्रतिबंधकज्ञानविषयोः बाधसाध्याभावादिमत्पक्षाभावादिस्तदुपस्थितेवाजननयोग्यत्या समानयाबलोपस्थित्या तथा
विधव्याप्यादिबुध्याप्रतिबंधकार्यस्यतादृशलिंगत्वमित्यर्थः विरोधिव्याप्यादिविषयत्वलक्षणयायतास्रातिन्याअप्युपस्थि
तेरप्रमाण्यग्रहेसत्प्रतिपक्षत्वासंपादकत्वात्कार्यप्रतिरोधानुधावतसमानत्वेनागृहीताप्रामाण्यकसाध्यविधर्मिकपरामर्शक
लीनत्वेनात्पतौ गृहीताप्रामाण्यकेवा परामर्शे सत्प्रतिपक्षितव्यवहारविरहात्। ननु प्रामाण्यानिर्णये नाधिकबलतयाबाध
कस्याविरोधिपरामर्शस्यवारणाय समानेतितदसत् व्यभिचारेणाभाणाप्रमाण्यग्रहस्येव तत्वादन्यत्र प्रामाण्यग्रहानुकूल
त्वेनैव कस्तित्तदुपयोगात्स्वपदोपस्थापादनाच्च उक्तरूपलबाधान्तत्तद्धेयथार्थो लिंगपदोपादानाच्चस्वीयलिंगोवोपाधिकपराम
र्शस्ताभ्यादाभादिपूर्वदासेहविरोधिपरामर्शप्रतिरुद्धकार्यकविशिष्टपरामर्शविषयत्वं तुफलितार्थः। गृहीतप्रामाण्य
कत्वसंवलिततयोग्यतोपादाने तु बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविषयत्वं तु तद्वाच्यं यदि वा
पर्वतोह्रियाप्यवाश्चेत्यनुमितिः प्रामाणिका न तु सत्प्रतिपक्षत्वे तदा कार्यप्रतिरोधोवश्यमुपादेयो जनितविरोधिबोधत्वेनाविरोधिपराम

५८

गः केवलान्वयिनितत्सत्वेपि अन्वयव्याप्त्युपादानेनानुमितिप्रतिरोध इति दिक्। साध्यविरोधित्वं साध्यप्रतियोगित्वं एकदेशिमतमाह भावाभाव इत्यादिना भावस्य
स्वाभावविरहात्मकरूपप्रतियोगित्वग्राहिधर्मिग्राहकमानबाधः प्रतियोगित्वस्य संबंधांतरत्वात्स्वाभावस्य तत्र पक्षार्थस्य तस्यावश्याभ्युपेयत्वात् विरहत्वं च
नाभावत्वं बाधात् नापि तद्ग्रहप्रतिबंधकग्रहविषयत्वं अविरोधात् प्रत्यक्षेण दुर्ग्रहत्वाच्चनवानस्थाअभावस्य स्वाभावाभावत्वे बाधकाभावात् भावस्य तथात्वे
बाधकमाह बाधके विनेत्यादि अभावप्रतीतिरभावत्वविशिष्टप्रतीतिः अभावत्वं च नभावभिन्नत्वं प्रथमं दुर्ग्रहत्वात् किंत्वयमभावो न भाव इति प्रतीतिसिद्धकंपसादाथां
तरंतज्ञानुपस्थितं निर्विकल्पकोपस्थितं वा प्रकारः अभावत्वं सम वेतत्वान्न जातिः अन्यथेति अनतिप्रसक्तेरधिकरणे स्तधर्मे वा भावव्यवहारोपपत्तेरिति
भावः लाघवाद्भावितोभावत्वविशिष्टप्रत्यक्षबलाज्जातिरिति काशिवसिद्धिस्तत्वैव एतेनाभावत्वं सप्रतियोगिकत्वं तज्ज्ञानुगतानामप्यावश्यका
नां प्रतियोगिकानां कल्प्यत इति परास्तं संयोगादिसाधारण्याद्गमकत्वभ्रमेति व्यभिचारिण्य व्यभिचारमात्रे विरुद्धे तु सामानाधिकरण्यांशेपि भ्रमश्च
त्यज्ञाको विशेष इति इषकताग्राम विशेषेपि निग्रहस्थानत्वे विशेषादुद्देनोपन्यासः एतश्चानैकांतिसामान्यलक्षणो साधारणलक्षणे च विरोध
वारकं विशेषणं। छले जात्यां निग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्ववदेतस्यानैकांतिकविशेषसाधारणविशेषत्वेपि अदोषे वेति
पुनराकारानुयायीपंथाः नापीत्यादि व्यापकत्वं व्यापकसामानाधिकरण्यघटितं न वा आद्ये साध्याभावस्येति द्वितीये तु नाभासत्वमविरोधित्वात् सा
ध्येत्यादि हेत्वभावस्य साध्यवन्निष्ठाभावप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहविरुद्धिरित्यभिप्रायेण
दं यदि वा सदेभावेनासामानाधिकरण्यग्रहे पितत्वेन सामानाधिकरण्यग्रहो न विरुद्धातरविविभाव्यते तदाह यद्वेत्यादि वृत्तिमतरतिधर्मेतिनपक्षधर्मत्वाविरोधित्वप्रद

यममिप्रायः एकधर्मिकाविरुद्धानेकप्रकारकनानाधर्मिकाविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेकधर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपं
संशयत्वेन न जन्यतावच्छेदकं तत्तद्धर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपसंशयत्वं न जन्यतावच्छेदकत्वं तत्तद्धर्मिकतेष्टकारिकज्ञानत्वप्रयोज
कसमाजप्रयोज्यत्वात्समाजस्यैकविद्वितोधभानस्यापि तत्प्रयोजकाधीनत्वात् मीने तत्र घटत्व घटत्वाप्रकारकज्ञानत्वैकधर्मिकाविरु
द्धानेकप्रकारान्यज्ञानत्वादिवत् संशयान्यज्ञानत्वादिनिश्चयत्वमपि न जन्यतावच्छेदकं तत्प्रयोजकविरहात् । तद्विरहाद्युपपत्तेः एवं
च तुल्यबलाभ्यां विरुद्धोभयसामग्रीजायमानं ज्ञानमर्थात् संशयरूपं भवति अत एवाहत्यैव विप्रतिपत्तिजन्यमानं संशयमामनंति फ
लबलकल्पनीयश्चान्यूनाधिकसमबलभावः । सत्यामपि पीतत्वशुक्लत्वस्मृतौ सविधवर्तिनि शंखे सति दोषविशेषे पीतत्वस्यै
वासति च शुक्लत्वस्यैव दूरस्थे च धर्मिण्यसति विशेषदर्शने स्मृतयोरेव कोट्योः सत्त्वे एकस्या एव नयनेन ग्रहणात् तथैवाविरुद्धत्वा
भ्यां विरोधिसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात् किं न स्यात् यदि वानुभविरोधः । येन गुणापि निश्चयत्वेन संस्कारजनक
त्वमुपपद्यते भवता । अथ विरोधिनानिर्णयोनुमितिप्रतिबंधको विरोधित्वं वहानवस्थायिस्थायित्वं साध्याभावस्य व्याप्य
स्यापीति चेत् यदि वस्तुतो विरोधिना निर्णयस्तथा कथं तर्हि पक्षतावच्छेदकादेः साध्यादिस्य निर्णये धर्मानुमितिः । अथ विरोधित्वे
न तदा तद्दहे नेह साध्यमित्यादिनिर्णयेप्यनुमितिप्रसंगः । अथ विशेषदर्शनं विरोधिबुद्धिप्रतिबंधकं कथमन्यथा तदनंतरं भ्रमसंशा
वितिचेत् न संस्तवपि शुक्लत्वादिव्याप्यदर्शने शंखादौ दुरवे नयनेन पीतत्वादेः अदुष्टे पीतत्वादिव्याप्यवत्ताभ्रमसत्यपि शुक्लत्वादर्प्यहात् सति

च विशेषदर्शने कचिदुपनीतभानानुदयात् दूरत्वप्रमितस्यापि स्थाणुत्वादेः शाखादौ करादिभ्रमेणाग्रहात् तत्र तच्छन्नविशेषस्य तस्य प्रतिबंधकत्व
मिति । अत्राहुः अनुगतकार्यकारणानुरोधाभावात् दोषविशेषघटितज्ञानेकदाचिदनुभवे बाधविशेषदर्शनविरोधिकल्पनेन प्रत्यक्षए
व तथा सामान्यबाधकाभावात् बाधाभावव्याप्यवत्त्वनिश्चयेन शाब्दादिधीप्रतिरोधात् अथ विशेषांतरदर्शने विशिष्टमेव तत्तथा अन्यथा को
टिद्वयविशेषदर्शने संशयानभिव्यक्तिरेतन्नभवत्यवतावच्छेदप्रामाण्यं न गृह्यते अगृहीतप्रामाण्यस्यैव विशेषदर्शनस्याविरोधित्वा
दिति विरुद्धस्येत्यादि साध्याभावव्याप्यस्येत्यर्थः बाध इतिहेतौ प्रकृतेन्यत्र वा अपक्षधर्मत्वपक्षधर्मताबाध इति शेषावात तथा च हे
तौ व्याप्तिपक्षधर्मतान्यतरबाध इत्यर्थः प्रकृतेति प्रकृतसाध्ययोर्यो हि तुतयोरित्यर्थः । संशयादितज्जन्यदुःखोत्सारणरूपे
ष्टसाधनताज्ञानादन्यत्र वेष्टांतरसाधनताज्ञानात् ज्ञानेच्छेति सिद्धेन विकल्पोपन्यासः । असतीत्यादि हेतुसमानीनत्वासमानीनत्व
संशयजन्यदुःखाभावरूपेष्टसाधनताज्ञानद्वारेण जिज्ञासोपयोगित्वादित्यर्थः । उत्पत्तिकाले उत्पत्तिपूर्वकाले व्याप्तिपक्षधर्मता
ज्ञानयोरुत्पादकमानियमात् उभयोर्नाशकत्वाभिधानं उत्पत्तावेव वा तयोरन्वय यत्र व्याप्तिपक्षधर्मतयोः समूहालंबनं तत्र द्वित
यपरामर्शोत्पत्तिकाल एव प्रथमपरामर्शनाशः । अस्य निरुक्तसत्प्रतिपक्षित्वस्य ज्ञान्यन्येति सत्ताकं वृथ्यादिमत्त्वादावेकैकस्य
व्यभिचारादिद्विशिष्टोपादानं घटनिष्ठेति घटनेष्टात्यंताभाववत्त्वसामान्यतः पक्षत्वान्वबाधाश्रयासिद्धौ नन्वाघस्य समवेतत्वादित्यादौ द्वितीयस्य

६०

पटत्वाभावादौ व्यभिचार इत्यत आह विशेषदर्शनेति वस्तुतो घटो नाभिधेयः कंबुग्रीवादिमत्त्वादावेकैकस्यादित्यादिव्यतिरेकिणासत्प्रतिपक्ष
संभवत्येव व्यापकाभावेनाप्रसिद्धस्यापि व्याप्याभावस्याभ्युपगमात् प्रत्येकपदार्थप्रसिद्ध्यैव प्रतिद्वन्द्व्युपपत्तेः विशिष्टस्य वा
प्यत्वात् सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवान् पक्षः पक्षनिष्ठसाध्याभावसाध्यवद्भेदव्याप्यादिमान्
प्रत्येकमेव विशेषणं तु प्रकृतसाध्यपक्षवैशिष्ट्यग्रहविरोधित्वे सति प्रकृतपक्षसाध्यग्रहाविरोधि प्रकृतसाध्यवैशिष्ट्यप्रकृतिग्रह
विरोधोरूपान्नायकत्वं च पादृशे विशिष्टविषयत्वे न परामर्शस्यानुमितिजनकत्वं तत्त्वं च साध्याभावव्याप्यवत्पक्षाधिकं असाधा
रणविरोधयोरन्यतरस्य प्रतिपक्षविषया दोषत्वपक्षे प्रकृतसाधनप्रकृतसाध्यव्यापकाभावप्रतियोगित्वावगाहिपराम
र्योग्राह्यः ।। अत्र च सत्यं तेन प्रतिपक्षो नायकस्याविरोध्यं तेनावह्निव्याप्याभावे साध्ये वह्निव्याप्यवत्पक्षा [illegible]कस्य बाधस्य व्यद
सः संग्रहे ते बाधेन कान्तमयं वह्निमानित्यादौ च व्याप्यभावव्याप्य द्रव्यत्वादिमान् पक्ष इति सत्प्रतिपक्षे च यथासिद्धान्तं परा[illegible]वा
दि प्रयोगमिच्छति अयं हेतुः साध्यव्यभिचारवानित्यादिवदयं पक्षः साध्याभावव्याप्यवानित्यादिकमेवोद्भावनं पुनरुक्तं प्रति
भाति वस्तुत इत्याद्यभ्युपेयं मात्रं विशिष्टपक्षपरामर्शविरोधित्वे न विशिष्टभावस्य दोषतायाः स्वीकारात् प्रत्येकाभावमज्ञात्वापि
शाब्दादिना ग्राह्यत्वात् व्यर्थविशेषणस्यासाधकतया साधनस्यैव संक्षेपत्वात् तेन वा तादृशाभावानवच्छेद्यव्याप्त्यधर्मान्तरेणावच्छेदकत्वमत्र
क्यत्वात् विशेष्यादिप्रतियोगित्वमात्रस्य व्यभिचारिसाधारणत्वादिति व्यभिचारादेरिति संक्षेपतो [illegible] ज्ञायमानतदानीं सिद्धि ६०

६१

व्याप्यानुपन्यास इत्यत आह प्रत्यक्षादेरिति अत्र हेतुमाह कथाप्रमितिप्र[illegible]स्य स्वरूपसत्तयैव बोधकत्वात् विरोधिकाव्यमानस्यानुमित्यविरोधात्
बोधविशेषणीयः। अत एवाग्निमल्लक्षणे विरोधि बाधकान्यतिफलतो ज्ञानविशेषणं एकस्य प्रामाण्यग्रहे परेणानुमितिजननात् तद्वारणा
य वा तत्प्रतिरुद्धकार्यत्वं न प्रतिरुद्धकार्यकपरामर्शविषयत्वं एकदेत्यादिना च द्वितीयस्य परामर्शस्योत्पादसमये पूर्वेणानुमितिजननात् तद्वारणाय वा तत्प्र
तिरुद्धकार्यत्वं न प्रतिरुद्धकार्यपरामर्शविषयत्वं एकदेत्यादिना च द्वितीयस्य परामर्शस्योत्पादसमयपूर्वेणानुमितिजननात् के[illegible]नेरं तयोर्मितिबा
साधकमानादिवसेन लक्षणमनुमित्यनुत्पादसंभवात् च परेति। अयं भावः। न खलु संभवंतः सर्वे सर्वत्रैव हेत्वाभासाः समुद्भाव्याः। आधि
क्यप्रसंगात् परं तु यथाकाममेकः तथा च प्रतिपक्षोद्भावनेपि नाप्रतिषेधुमात्रेण व्याप्त्याद्यभ्युपगम इति प्रतिरुद्धत्वेपि प्रतिरोधिन्नयो
जनकविरोधिव्याप्त्यादीत्यर्थः उभयोरिति परस्पराभावव्याप्यत्वं हि हेत्वोर्विरोधः। न तद्ग्रहे च तयोरेकतरनिर्णयो न विरुध्यत इति भा
वः। दूषकतेति। विरोधिपरामर्शसत्त्वे नियमेन परामर्शादनुमित्यनुत्पादस्तस्यानुमितिविरोधित्वं कल्प्यते इति न तु तेन ज्ञायमानस्य
व्याप्त्यादिविरहस्य सध्रेतावपि तस्यानुमितिविरोधित्वादित्यर्थः। व्याप्त्यादिविरहज्ञानद्वारा दूषकत्वमाह एकत्रेत्यादि बाकारोनास्य
यां प्राथमिकावश्यकानुमितिप्रतिरोधेनैव तत्त्वात् परमुखनिरीक्षकत्वेन तद्विषयस्याभावत्वायोगाच्चेति तन्तु विरोधिपरामर्शो
यदि विपरीतनिर्णयविरोधी कथं तर्हि सति विशेषदर्शने नयनादिजन्मापीतत्वादिभ्रम इत्यत आह चक्षुरादेरिति बाधवदर्थः। अ
अथ व्याप्तिपक्षधर्मते यदि चेत् कथं तर्हि प्रत्यक्षादेः प्रतिरोधकतया केवोध्याभावव्याप्यवत्तानिर्णयेनैव शाब्दबोधप्रतिबाधाच्च तिरस्कारः [illegible]

६१

प्रसंगः प्रकृतपक्षाप्रविष्टाभावकसाधारण्यादिभिन्नत्वं वावक्तव्यं परामर्शेनान्वयव्याप्तिरूपादेया ॥ तेनानुपसंहारित्वव्युदासः
साध्यसाधनभेदेनासिद्धिभेदाद्यत्र साधारण्याधिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयं यथाकाञ्चनमयः पूर्वतो ह्रदो वा वह्निमान् नेमे
धो वा धूमात् मयत्वाद्धूत्यादौ पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादावसिद्धिसंपादनाय हेत्वाभासलक्षणाकरीति
रनुसर्तव्या तत्र विशिष्टपक्षस्य ज्ञानस्य विरोधिना असिद्धिः अविरोधिरूपत्वेनाश्रयासिद्धिः विशिष्टपक्षविशिष्टहेतुज्ञानाविरोधिनो ज्ञानस्य
विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकरूपस्वरूपासिद्धिः संगृह्यते वानेन नित्यगगनं रूपवत् चाक्षुषस्पर्शवत्वादित्यादौ
गगनादेर्न स्पर्शादिकं । एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्वात् गुणान्यत्वविशिष्टसत्वात् व्यत्वव्यभिचारिगुणवृत्तित्वादित्यादावपि नाव्या
प्तिः तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः पक्षादिभेदेनासिद्धभेदान्वयत्राश्रयासिद्ध्यादिकं दिकमप्रसिद्धं तत्र तदन्यत्वेन वक्तव्यं सति
षयवृत्तिप्रकृतसाध्यसाधनग्रहविरोधितावच्छेदकप्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपशून्यस्य ज्ञानस्य
विषयो सिद्धिर्व्याप्यत्वासिद्धिः साध्योपादाना पर्वतः पर्वतवृत्तिद्रव्यत्ववान् कदलादित्यादौ साध्याप्रसिद्धेर्नासंग्रहः तस्याः स्वरूपासि
द्धेर्निवेशादनुपादेयमेव वा साध्यमित्यपि कश्चित् । साध्यहेत्वसिद्धिर्व्याप्त्यविशिष्टपक्षधर्मतादिविरहाच्च तद्भेदाः । यत्तु हेतुतावच्छेदक
स्य व्याप्यतानवच्छेदकत्वे व्याप्यत्वासिद्धिः नीलधूमत्वादेस्तु तथात्वे समानाधिकरणं संभवद्वच्छेदकतारूपगुरुत्वादिति तत्रावच्छेद
कं यद्यनतिरिक्तवृत्तित्वं यदन्यतिरिक्तवृत्तित्वे तदा तस्यापि स्तितथता दृशेन सामानाधिकरणतादृशेन वाधर्माशरणघटितत्वे सति तत्त्वं तत्स

६१ ४

त्यन्तस्य गौरवेणानुपादेयत्वात् नापि न्यूनवृत्तित्वं आलोकाद्यवृत्तेः धूमत्वादेरपि तथात्वापातात् तथारूपसंबन्धविशेषः तर्हि द्रव्यं रूपादित्यादौ रू
पत्वादेरपि तथात्वं न स्यात् पादिसु तु विशेषतो संभवतः अवच्छेदकमेकं गुणत्वमपि स्यात् रूपत्वादीनां बलुविशेषते पदिंशते वा गुरुत्वात् एवं पशुमान्साध्या
दिमत्वाद्युत्यादौ सास्नादिमत्वादेरपि गोत्वादिके जातिमपेक्ष्यो पाधेर्गुरुत्वात् हेतुतावच्छेदकविशिष्टहेतुव्याप्त्यैव पक्षसाध्यसामानाधिकरणतादृशहेतोः
साध्यव्यभिचरितसंबन्धिताद्यवच्छेदो वा ज्ञानस्यानुमितिकारणस्य विरोधिनो निरुक्तानवच्छेदकत्वस्य दोषत्वायोगात् इति पदार्थस्थले तु दृष्टं तस्य
साधनवैकल्यबाधितो वा यद्यविशेषणत्वमपि निग्रहस्थानविभाजकसूत्रस्थानुक्तसमुच्चायकेन कारेण समुच्चयक ॥ हितं पृथगेव निग्रहस्था
नेऽतिरिक्तविषयतावादिमतेनाह पक्षेति पक्षः साध्याभाववानिति ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकारः साध्याभाववदृत्तिलक्षणसमन्वयः वि
वक्षितेति हेत्वादिविषयत्वेनात्रेति बाधकत्वादिति भावः साध्याभावप्रमात्वग्रहे साध्याभाववत्त्वग्रहास्यावश्यकत्वाभिप्रायेण साध्याभाववत्त्व
बाधत्ववादिमते नवाशंकते अथैतिपक्षइति व्याप्त्यौ निश्चितायां पक्षसत्त्वमयोः साध्याभावसंशयो न दोषायेत्यर्थः । अनुमित्युत्पादनेति फल
तोपि विरोधिप्रदर्शनाय स्वतएवान्याया स्वरूपतो विरोधित्वं दृष्टयति ~~विसंधति~~ अन्यथेति हेत्वाभासाधीनत्वमिति नवहेत्वाभासस्यानुमि
त्याभासता प्रयोजकत्वे साध्यवति पक्षे लिंगाभासजायामनुमितेराभासत्वापत्तिः लिंगोपधाने तथात्वस्य एत्वात् पक्षासिद्धिरित्यस्य बाधकमान
निबंधनेत्यादिः लिंगस्य त्वाद्युपस्थु चयमात्रं वन्हेरपक्षत्वाद्वकाञ्चनमयत्वस्यासाध्यत्वाद्ध नवसाध्याभावभित्यनुमितेः पूर्वं विशिष्टस्याप्रसिध्या
तदभावस्याज्ञानादितिश्च वर्तते वोक्तत्वादितिभावः । तथा चेत्यादि अधिकबलत्वेनाधिकबलरूपत्वेनापेक्षणीये व्यभिचारो व्यभिचारनिश्चयः साध्या

शिव

६२ दि

सावो निश्चीयते येन प्रामाण्यनिश्चयेन तदधीनेत्यर्थः। अत्रेदं तत्त्वं साध्याभाववान् साध्यवदन्यो वा पक्षः पक्षवृत्ति साध्यं पक्षे साध्याभावः पक्षस्य साध्याभाववत्त्वादिकं साध्यादेः पक्षावृत्तित्वं साध्यवत्सामान्यादेः पक्षान्यत्वादिकं विशिष्टे साध्ये पक्षादेर्विशेष्याभाववत्त्वादिकं यथामतं पक्षे साध्यवत्त्वज्ञानस्य साक्षाद्विरोधिप्रत्येकमेव बाधः तन्निश्चयो विरोधितन्निश्चयत्वेन दोषविशेषाद्यजन्यज्ञानमात्र एव विरोधी अत एवान्वयनिश्चयविरहो योग्यतेत्याचार्यः विभाजकं तु प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोध्युन्नायकत्वे प्रकृतपक्षप्रकृतसाध्यग्रहाविरोधित्वे च सति प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वं साध्यासामानाधिकरण्यादिधर्मवत्त्वादिकं बाध एव साध्याभाववत्पक्षादिज्ञानप्रमात्वं तु न बाधः तज्ज्ञानस्य पक्षादौ साध्याभावादेरनवगाहित्वे विरोधिविषयत्वाभावात् अवगाहित्वे तु तद्विषयत्वेनैव प्रतिबंधकत्वात् प्रमात्वनिश्चयस्यान्यत्र प्रतिबंधकत्वाकल्पनात् सर्वत्र निश्चयस्य हेतुत्वे प्रतिबंधकत्वे च भ्रमत्वाग्रहः संशयसाधारणज्ञानमात्रस्य तथात्वे तु भ्रमत्वानिश्चयः प्रयोजको न्यथाकांक्षाकृतिसाध्यतादिनिश्चयहेतुप्रतिहेतुपरामर्शादीनां प्रमात्वनिश्चयायोग्यताव्यभिचारज्ञानादीनां च प्रमात्वज्ञानं प्रयोजकीभवेदनुभवसिद्धत्वादौ गुरुत्वाद्यभावधर्मेण गुरुत्वाद्यनुमितिं विना तदप्रामाण्यग्रहं नहि स्वरूपसत्यपि बाधनिश्चये ज्ञानानुमानसादिज्ञानमुत्पद्यते अथ लाघवेन संशयसाधारणासंस्पृष्टत्वज्ञानमेव ज्ञानानुमित्योः कारणमात्रं तस्यैव विरोधितया प्रकरणसमो बाधश्चेहेत्वाभासोऽसिद्धिरिव परामर्शस्य विरोधितया प्रसिद्धसाध्यकमनुमानमितिचेन्न संशयासत्त्वसमये परामर्शात्यादेसिद्धिरिति बाधविषयं विनानुमित्यनुत्पादप्रसंगात् इतिविशेषदर्शने संशयायोगादिति। एतेन लाघवात् प्रमात्वेन निश्चीयमानं बाधज्ञानं विरोधीति परास्तं विपरीततया च लाघवस्फुटत्वं च तज्ज्ञानस्य साध्यके तत्र हि गोत्वाद्यप्रकारके गोत्वाभावादिप्रकारकज्ञानं बाधाभिन्नयोः

तु तेन सत्यमाने प्रतिबंधे पिकालांतरगृहीतत्वेन व्यभिचारादिना तदानीं नाभासत्वं स्वग्रहमिति तु ध्येयं तेन रूपेण वन्ह्यभावे नीलवन्ह्यभावस्य प्रतिबंधकः कारणीभूतयोः भावस्तत्प्रतियोगिन एव तथात्वात् यदभावत्वेन कारणत्वं तदेव तदेत्यधिकेरितु परामर्शेत्यादिना तु परामर्शविषयभावत्वमनाभासे आभासत्वविशेषितमपि बाधे परामर्शविरोधित्वं विरोधिते वहेतोः साध्यसामानाधिकरण्यं तु प्रसक्तमप्रसक्तं न साधनाद्यभाववत्पक्षादौ पक्षादेः साधनवदन्यत्वादौ साधनादेः पक्षादिवृत्त्यन्यत्वं पक्षविशेषाभावप्रतियोगित्वादौ अत एव यस्य यद्धर्मत्वं परामर्शविषयस्तस्य तदभाववत्त्वं तदितिशब्दमात्रानुगतं प्रत्युक्तं परामर्शविरोधित्वमात्रं च सव्यभिचारेति प्रसक्तेन न तदन्यत्वेन विशेषणीयमित्याद्यघटो द्रव्यं प्रमेयो वा जलत्वादित्यादौ तदर्थाप्रसिद्धेः अथ पक्षतावच्छेदकरूपेण हेतोर्यद्विशिष्टज्ञानसाध्यतावच्छेदकविशिष्टसाध्यावगाहि तद्विरोधित्वं तदिति चेन्न पक्षवृत्तित्वविशिष्टसाध्यव्याप्यवृत्तिसामानाधिकरण्याभावाद्युक्त्यात्यैः न च विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यविशिष्टसाध्यग्रहविरोधियद्व्याप्तिग्रहविरोधितदन्यत्वे सति परामर्शविरोधित्वं तद्विशिष्टपक्षवैशिष्ट्योपादानात्तु वन्हिमान् वन्हिमान् जलह्रदत्वादित्यादौ व्याप्तिग्रहविरोधिनस्ताद्वस्थ्ये ग्रहाविरोधिनस्ताद्रूप्यासंग्रहाविरोधिनो रूपस्याप्रसिद्धेः उच्यते साधारण्यसाधारण्यभिन्नज्ञाना तस्य विषयतया परामर्शविरोधितावच्छेदकरूपमसिद्धिः वन्हिव्यभिचारिमेयत्ववान् वन्हिसमानाधिकरणह्रदत्ववान् वा पर्वतो वन्हिमान् प्रमेयत्वात् ह्रदत्वाद्वा इत्यादावाश्रयासिद्धिविरहेपि न क्षतिः। असिद्धित्रयस्यासार्वत्रिकत्वात् आश्रयासिद्धिलक्षणस्य चाघटितासिद्धिघटितत्वान्नाति

६३ ऽनुपादानात्तथा व्यभिचारो नदोषाय उपनीतस्य कल्पभानेनाप्रामाण्ये प्रत्यक्षेपि तुल्यं अनुदेश्यत्वेनानुमितेरप्रामाण्यं न बाधिदिविषयप्रयोजकमिति तत्र प्र
त्यक्षे हि विना संनिकर्षमभानात् उपनीतभानस्य च प्रत्यभिज्ञा [illegible] दावानुभाविकत्वाद् पनयोपि संनिकर्षः कल्प्यते अनुमितौ न फलासिध्यानसा
मग्यं तत्कल्पनानं खलु वन्हिव्याप्य धूमपरामर्शाद् उपनीतस्यासभानुमितिरानुभाविकी कस्यापि अन्यथा पर्वते वन्हिसंदेहवतो निश्चितवन्हिव्यभिचारादविषय
त्वात् प्रमेयत्वमनुमिन्वतोपि वन्ह्यर्थिनो वन्हिमत्वनिश्चयवतो निष्कंपप्रवृत्त्यापत्तेरिति पक्षधर्मताबलेनेत्यादिनतु विशेषतो व्याप्त्यग्रहात्तथा सिध्धिस
साध्यवनो मान्यतः क्षित्यो न विशेषतो बाधो विरोधी भिन्नप्रकारत्वात् न च समानविषयत्वमेव विरोधित्वे तत्र पृथिव्यादिरूपबाधग्रहेपि वायुरूपवात्र वेति
संज्ञायात् रूपवानित्यनुमितेश्च न वा रूपमेव रूपत्वेन शंकितमारोपितं वा तद्विषयः तादृशशंकाविरहेपि तयोरानुभाविकत्वात् दोषवशाद्वेह्रस्वत्व
त्वं द्रव्यमिति भ्रमेपी ह्रस्वत्व इति प्रत्ययात् घटपटौ न स्तः दंडी चैत्रो नास्तीति ग्रहेपि घटोस्ति चैत्रोस्तीत्यवगमात् न संलिंगपरामर्शाद्बुधितविशेषभानप्रसंगश्च
विशेषबाधप्रसंगश्च विशेषबाधावतारानवतारयोः समानत्समाधानश्च अत्र वदंति व्यापकतावच्छेदकरूपेणाद्यविज्ञानादिसहकारित्वशादनु
मितौ प्रकारी भवति यथा जीवनमरणान्यतरप्रतियोगी प्राणित्वादित्यत्र जीवनप्रतियोगित्वं अन्यथा जीवत्वे सति ग्रहास्तत्वस्य हेतोरसिद्ध्या बहिःसत्वानु
मानायोगात् एवं क्षित्यादिकं तु सकर्तृकत्वामपि अन्यथा एकोनेकोवा क्षित्यादिकर्तेति संदेहप्रसंगात् अनुमितेश्च तादृप्येण लब्धार्थविषयत्वे तथानुव्य
वसायविरहात् लाघवप्रतिसंधानेन धर्मपरिच्छेदकत्वमनुमानस्य त्वाद्यापि न क्षिध्येत इत्थं च विशेषतो ज्ञायमानामनुमितिं विरुणद्धि बाधप्रमितिर्बाधः पृथ
क्त्वलिंगपरामर्शाद्वक्तथाश्चौतानुमितिर्जायते तान ज्ञायते वा केवं यथार्थेति केचित् । बाधनवतारे बाधितार्थे लाघवतानाद्दोषादेव तथा सामान्यतो दृष्टात
दितरप्रसिद्धासे च विशेषबाधसहकृतात् छिष्यमाण प्रसिध्यप्रकारिकानुमितिर्जायते यथा भोजनसाध्यपीनत्वात् दिवासंध्याभोजनबाधे रात्रिभोजनप्रकारिकाए ६३

वंद्रव्यावृत्तित्व साधनक गुणत्वादिष्ठायादि गंतद्रव्यवृत्तित्व बाधे प्रसिध्यमानोवृत्तित्वानुमितिर्ज्ञायमानामनोवृत्तित्वाभावप्रमया बाध्यत इति विशेष बाधो दो
षः किंतु साध्येत्यादिकमापाततः वस्तुतस्तु प्रतियोग्यसामानाधिकरण्यसंबंधविशेषावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्व
मित्वं व्यभिचारः । स्वप्रागभावेत्यादिकं स्पष्टत्वेनोक्तं तत्र तदानीं तदुत्पत्त्यभावस्यापि व्युत्पादितत्वात् अत एवोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वादिना रूपा
दिसाधने बाधेनिराबाधपदमादधाति एवं साध्यवत्तावच्छेदकदेशावच्छिन्नस्य पक्षत्वेपि बाधो बोध्यः । अथ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धौ त
दवच्छेदेन हेतुमत्वज्ञानं प्रयोजकं अन्यथा गृहीतत्वाभागासिद्धेः घटत्वादेरपि पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसंगात् न च क्षित्वाद्यवच्छेदेन धूमादि
मत्वमिति चेत् न तावच्छेदकत्वद्वयोर्वस्तुतोभेदात् तथाहि सोप्यमेयाकिंचित्करत्वात् अवच्छिन्नावृत्तेरपि वहेत्वोस्तत्वेन गृहीतात् ज्ञायमानामनुमितिं विरुद्धि
बाधप्रमासंकरेपि वस्तुतो ज्ञानासंकरात् सुखाद्यनवच्छेदकशरीराद्यवच्छिन्नात्मादौ सुखादिसाध्यकदुःखादेर्वर्त्तमानत्वात् क्वापि संयोगाद्यव
च्छेदकमूलाद्यवच्छिन्ने वृक्षविशेषत्वादेर्वर्तमानत्वाच्च । अत्र चैतत्कालावच्छिन्नः पर्वतो वन्हिमानिति शाब्दादिवैतत्कालावच्छिन्नपर्वतपक्षे धूमादे
रपि एतत्कालावच्छेदेन वन्हिमत्वबुद्धिरनुभवसिद्धानां पन्नुवमर्हतीत्यभिप्रायः । ईश्वरवादेनु च विशेष्यमुपाधिः साधनव्यापकत्वादिति । साध्य
स्येति शेषः । शरीरसहकारेणैव कर्तुः कार्यजनकत्वात् शरीराजन्यस्य न कर्तृजन्यत्वं वाकर्तृत्वरूपसाध्यव्यापकस्य शरीराजन्यत्वस्य हेतोरव्याप
कतया साध्याव्यापकं विशेष्यजन्यत्वं नोपाधिरित्यर्थः ॥ इति श्री महामहोपाध्याय श्रीमद्भट्टाचार्य शिरोमणि निर्मितानुमानदीधि
॥ ॥श्रीसांबसदाशिवाय नमः॥ ॥शके १६९० सर्वधारिनामसंवत्सरे पुष्यवदी त्रयोदश्यां मंदवासरे सायंकाली नन्दिनी पुस्तकं समाप्तं ६४
ग्रंथसंख्या ४०००

६४

B.117
16

॥ ॥अनुमानखंडशिरोमणिः समाप्तः॥ ॥

६४

तस्य च गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वज्ञानाभावो भ्रमत्वविग्रहविरहः बाधग्रहः पक्षगोत्वाद्यभावप्रकारकज्ञानं तस्य च गोत्वादिमद्विशेष्यकगोत्वाद्यभा
वप्रकारत्वाद्यप्रकारत्वं गोत्वाद्यभावप्रकारत्वज्ञानं प्रमात्वनिश्चय इति उक्तप्राय च तत्तत्कार्यप्रतिप्रतिबंधकानां कारणाभावान्न निश्चयानां प्रमात्वे न निश्चीयमानत्वे
न तथात्वापत्तिरिति न च सति विशेषदर्शने विपरीतनिश्चयो किंकरः तत्सत्वेपि विशेषदर्शने नत्वत्यक्षोत्पादादिति वाच्यं विशेषदर्शनेन तत्राज्ञानानंतरमेव प्रत्य
क्षोदयात् परैरपि प्रत्यक्षविशेष एव विपरीतनिश्चयविशेषस्यैव तथात्वोपगमात् नहि शब्दादिबाधेपि विशेषादर्शनविशिष्टत्वेन सविरोधी गौरवात् मा
नाभावाच्च न वा चाक्षुषादिप्रत्यक्षेमानसादिविपरी।तनिश्चयो विरोधी उपयुज्यते न च केचिद्विशेषदर्शनमप्रामाण्यग्राहकत्वेन बाधमुक्तं बुध्येः न चैवं बाधावतार
दशायां पक्षे हेतोरग्रहे ज्ञानलक्षणासिद्धिः ग्रहे च व्यभिचारधीरेवेति वाच्यं बाधग्रहपरामर्शयोर्भेदात् अभेदेपि पक्षः साध्यव्याप्यहेतुमान् साध्यादेः पक्षा
ववांश्चेति ग्रहस्य परस्परोपरागानवगाहित्वेनाव्यभिचाराविषयत्वात् एकत्र व्यभिचारयोरेकनिश्चयगोचरत्वात् पूर्णे च करणे साक्षादनुमित्यविरोधिनो व्यभि
चारज्ञानादेरकिंचित्करत्वात् उक्तं च साध्यादेः पक्षाद्यवृत्तित्वादिकमपि बाधः न च तद्ग्रहव्यभिचारबुद्धिरावश्यकी यत्वनिश्चितप्रामाण्यस्य ज्ञानस्यार्थनि
श्चयरूपत्वे प्रामाण्यग्रहे वैयर्थ्यमिति प्रसंगश्च तथा च पक्षे साध्याभावज्ञानस्य निश्चयत्वसंपत्तये अपेक्षणीयः प्रमात्वनिश्चय एव प्रतिबंधकः प्रथमिकत्वाद
पजीव्यत्वाच्च न तु चरमभावितद्धीनव्यभिचारज्ञानमिति तुच्छं तत्तु प्रतिबंधकत्वेनाकॢप्तत्वात् अगृहीताप्रामाण्यत्वेनैव निश्चयस्यैव कार्यकारित्वदन्यथा
नवस्थानात् अप्रामाण्यशंकानिवर्तकत्वेन च कॢप्तप्रामाण्यग्रहस्योपयोगात् किं चायं साधारणस्य व्यभिचारज्ञानस्य विरोधित्वाच्च। यत्तु परे किंचनमयत्व
विशिष्टवत्त्वानुमितिविरोधी व्यधिकरणकांचनमयत्वावच्छिन्नाभाव प्रतियोगिताकोवह्न्यभावो बाधः न च विशिष्टसाध्याप्रसिध्या कथं तद्विशिष्टानुमितिवि त
शेष्यविशेषणमित्यादिन्याये तत्संभवात् उभसाध्यव्याप्तिग्रहादेकोपनयसहकारणप्रसिद्धस्य विशिष्टसाध्यानुमितिसंभवात् तदभावो बाधस्तत्तेन रूपेण व्याप्ते